RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2021-23
Posting Date.: 4-5, 19-20 of Every Month

॥ ओ३म् ॥
तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्य निद्राभिः
तान्निबध्नाति भारत!॥
(श्रीमद्भगवद्गीता - 14/8)

सर्वः सर्वं न जानाति, सर्वज्ञो
नास्ति कश्चन।
नैकत्र परिनिष्ठास्ति, ज्ञानस्य पुरुषे
क्वचित्॥
(नलोपाख्यानपर्व-अध्याय 72.8)

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत–संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥
उपार्जितानां वित्तानां त्याग एव
हि रक्षणम्।
तडागोदर-संस्थानां परीवाह
इवाम्भसाम्॥

यस्य स्नेहो भयं तस्य स्नेहो
दुःखस्य भाजनम्।
स्नेहमूलानि दुःखानि तानि
त्यक्त्वा वसेत्सुखम् ॥
(आचार्य चाणक्य)

卐 वर्षम्-१३ 卐 अंकः-०३ (२९१) नवदेहली 卐 १ अगस्तमासः २०२३तः १५ अगस्तमासः २०२३ पर्यन्तम् 卐 विक्रमसंवत्-२०८० 卐 सृष्टिसंवत्-१,९६,०८,५३,१२३ 卐 पृष्ठम्-८

## प्रत्येकं निवासी भारतोस्ति, 'तस्माद्युध्यस्व भारत'-आचार्यः सच्चिदानन्द द्विवेदी

वृत्तप्रेषकः- डॉ. चन्द्रकान्तदत्तशुक्लः,

एकादश्यां तिथौ समायोजिता श्रीमद्भगवद्गीता राष्ट्रीयव्याख्यानगोष्ठी। अस्याः गोष्ठ्याः पञ्चदशोयं पर्यायः संस्कृतविभागः डॉ. श्यामाप्रसादमुखर्जी विश्वविद्यालयः, राँची-झारखण्डः, राजकीय स्नातकोत्तर महाविद्यालयः, चुनार-मीरजापुरम्डॉ., चातुर्वेद संस्कृतप्रचार संस्थानम् वाराणसी इत्येतेषां संयुक्ततत्त्वावधाने सम्पन्नौभवत्। आयोजकविश्वविद्यालयस्य कुलसचिवमहोदया



डॉ. नमितासिंह सभाध्यक्षरूपेण अवदत् यत् गीता संस्कृतवाङ्मयस्य अलौकिकं दर्शनमस्ति। एषा मानवमात्रस्य कल्याणकारिणी प्रवृत्तिनिमित्तिका चास्ति। महोदया आसुरी-दैवीसम्पद्विषयेपि सम्बोधयत्।

मुख्यवक्ता आचार्यः सच्चिदानन्दद्विवेदी विभागाध्यक्षचरः शारदापीठमहाविद्यालयः द्वारका-गुजरातः आसीत्। महोदयः 'तस्माद्युध्यस्व भारत' इतिविषये साधनाविशेषवैदुष्यपूर्णं सम्बोधयत् यत् गीता केवलं श्रवणाय नैवापितु श्रुतिवचनानुसारं सर्वैः 'श्रोतव्यो मन्त्वयो निदिध्यासितव्यः' समाजस्य दशावर्णनपूर्वकं ज्ञापयत् समाजाय राष्ट्राय व यदुचितं तत् येन केनापि करणीयं न भवति चेत् श्रीमद्भगवद्गीता कथयति तस्माद्युध्यस्व भारत। राष्ट्रस्य प्रत्येकं जनः भारतः अस्ति। भारतं नाम अर्जुनः अतः अर्जुनरूपेण सज्जो भूत्वा कथयेत् 'करिष्ये वचनं तव'। डॉ. शैलेशकुमारमिश्रः राजकीयसंस्कृतमहाविद्यालयः, राँची विशिष्टवक्ता आसीत। महोदयः मनोनिग्रह विषये गभीरं ज्ञानप्रदं व्याख्यानं कृतवान्। उक्तवान् यत् मन एव मनुष्याणां कारणं बन्धमोक्षयोः, मनः शरीरे

शेषभागः षष्ठमपुटे

## पतंजलि विश्वविद्यालये वैदिकविदुषां उपस्थितौ 'शास्त्रीय-कण्ठपाठ-प्रतियोगिता' आयोजिता

### चेतनारूपान्तरणे सहायकम् अस्मच्छास्त्रम्-स्वामी रामदेवः
### शास्त्र श्रवणेन स्वाध्यायेन च मानवस्य कायाकल्पः सम्भवः-आचार्यः बालकृष्णः

हरिद्वारम्। पतंजलि विश्वविद्यालयस्य विशाल सभागारे दीप-प्रज्ज्वलनेन एवं चश्रद्धा सूक्त पाठेन सह मूर्धण्न्य विदुषाम् उपस्थितौ त्रिदिवसीय शास्त्रीय कण्ठपाठ प्रतियोगिता शुभारब्धा । केन्द्र सरकार द्वारा संचालितायाः नई राष्ट्रीय शिक्षा नीतेः अंतर्गतं भारतीय ज्ञान परम्परा प्रशिक्षणं



एवं च संवहनं प्रति विशेष बलं दत्तम् । तदुद्दिश्य प्रतिवर्षं पतंजलौ गीता, उपनिषद्, योग दर्शनं, पंचोपदेशः, निघण्टु शास्त्रं, च इत्येषां स्मरणाय प्रतियोगिताः आयोजिताः। अमेरिकातः कुलाधिपतिः पूज्य स्वामी रामदेवः सम्बोधनं दत्तवान् यत् अस्मत् आर्ष ज्ञान परम्परा ऋषिभिः दत्ता महान् न्यासः वर्तते यस्य रक्षा अस्मत्कर्त्तव्यम् ।

प्रतियोगितानां शुभारम्भे पतंजलिविश्वविद्यालयस्य यशस्वी कुलपतिः श्रद्धेयः आचार्य बालकृष्णः

शेषभागः सप्तमपुटे

## वैदिकभाषादर्शनोच्चारणविज्ञानविषयकसङ्गोष्ठ्याः समापनम्

डॉ.दिनेशः चौबे,उज्जयिनी

उज्जयिनीस्थस्थमहर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य वेदव्याकरणविभागदर्शनविभागयोः तथा नवदेहलीस्थभारतीयदार्शनिकानुसन्धानपरिषदः संयुक्ततत्त्वावधानेन वैदिकभाषादर्शनमुच्चारणविज्ञानञ्च इति



विषयाधारेण समायोजितत्रिदिवसीयसङ्गोष्ठ्याः समापनसत्रं सत्राभ्यां सह अधिकश्रावणशुक्लदशम्यां सम्पन्नम्।

समापनसत्रे अध्यक्षत्वेन विश्वविद्यालयस्य कुलपतिः विजयकुमार सि. जी. महोदयः आसीत्। मुख्यातिथिरूपेण नागपुरस्थस्य कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य कुलपतिः हरिरामत्रिपाठिमहोदयः, विशिष्टातिथिरूपेण तद्विश्वविद्यालयस्य कुलपतिचरा उमावैद्यमहोदया तथा विशिष्टवक्तृत्वेन देहलीस्थस्य लालबाहादुरशास्त्रिविश्वविद्यालयस्य आचार्यः रामसलाहीद्विवेदिमहोदयः च उपस्थिताः आसन्।

सङ्गोष्ठ्यामस्यामेकादशराज्यात् शोधच्छात्राः पत्रवाचनं कृतवन्तः इति महद्गौरवस्य विषयः। तथैव सप्ततिः शोधपत्राणि सङ्गोष्ठ्यामस्यां प्रतिपादितानि। समापनसत्रे चितपत्रवाचकानामनुभवकथनं विश्वविद्यालयस्य गरिमानां नितरामवर्धयत्।

समापनसत्रे हरिरामत्रिपाठिमहोदयः वेदानामपौरुषेयत्वं विविधानामैतिहासिकानां दार्शनिकानां च मतानि उपस्थापितवान्।



विशिष्टातिथिः उमावैद्यमहोदया शिशूनामुच्चारणसम्बद्धं विज्ञानं प्रतिपादितवती। तथैव विश्वविद्यालयस्य कुलपतिः उच्चारणविज्ञानेन छात्ररक्षणं सम्भवति तथा संस्कृतं विज्ञानस्य भाषा इति समुद्घोषितवान्।

एवमेव पत्रवाचनसत्रयोः भारतीयदार्शनिकानुसन्धानपरिषदः निदेशिका पूजाव्यासमहोदया महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य साहित्य-विशिष्टसाहित्यविभागाध्यक्षः डा० तुलसीदासपारौहमहादयः, श्रीमहाकालेश्वरशोधसंस्थानस्य निदेशकः डा० पीयूषत्रिपाठिमहोदयः च उपस्थिताः आसन्। त्रिदिवसव्याप्यामस्यां सङ्गोष्ठ्यां कानि ज्ञानरत्नानि शोधार्थिभिः संगृहीतव्यानि इति विषये कुलपतमहोदयः दिग्दर्शनञ्चकार। सञ्चालनं डॉ.संकल्पमिश्रमहोदयेन कृतम्।

# वैज्ञानिकतां समरसताञ्च प्रदर्शयति संस्कृतम् - प्रो. विजयकुमारः मेनन्

वार्ताहरः दीपकपाण्डेयः

उज्जैन। उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चालितासु कक्षासु संस्कृतस्य संस्कारस्य च ज्ञानं प्राप्यते इति आश्चर्यस्य न विषयोऽयं, किन्तु यावद्भाषायाः ज्ञानं नास्ति तावद्वयं संस्कृतभाषायां विद्यमानं विषयमवगन्तुं न शक्नुमः। अतः कस्यचिद्विकासज्ञानाय संस्कृतभाषाज्ञानमावश्यकम् । संस्कृतभाषाशिक्षणे बहव्यः संस्थाः संलग्नाः सन्ति, किन्तूत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चाल्यमाना इयं कक्षा श्लाघ्नीयैव।

विंशति-दिवसीय-संस्कृत-भाषा-शिक्षण-कक्षायां जुलाईमासे 15 दिनाङ्के बौद्धिकसत्रस्य आयोजनमभवत्। कार्यक्रमस्य आरम्भे प्रशिक्षुमनीषमहोदयः वैदिकमंगलाचरणमरोत्। तदनन्तरं प्रशिक्षुशिखामहोदयया संस्थानगीतिका स्वागतगीतञ्च प्रशिक्षुसोनी महोदयया विहितम्। अतिथिपरिचयपुरस्सरं वाचिकस्वागतं योजनायाः वृत्तकथनञ्च संस्थानस्य प्रशिक्षिकेन गोपालकृष्णमहोदयेन कृतम्। अनन्तरं ज्योतिमहोदयया अदितीमहोदयया च कक्षाविषयकानुभवः उक्तः । श्रावणमासोऽयं खलु अतः संध्यामहोदयया श्रावणमासविषयकं गीतं प्रस्तुतम् । संस्थानेन न केवलं प्रातिभाषिक संस्कृतभाषाशिक्षणमपितु, गृहे- गृहे -संस्कृतम्, योग-पौरोहित्याद्यनेकयोजनाभिः संस्कृतभाषायाः विकासः क्रियते ।अस्मिन् कार्यक्रमे मुख्यवक्तृरूपेण समागताः श्रीमन्तः प्रो. विजयकुमारः मेनन् महोदयाः कुलपतिः, महर्षि-पाणिनि-संस्कृत-वैदिक-विश्वविद्यालयः उज्जयिनी ,मध्यप्रदेशः। स्वोद्बोधने प्रो. विजयकुमारःमेनन् कुलपतिमहोदयैरुक्तं यत् आधुनिके काले यः कश्चिद्वैज्ञानिकनियमः स्यात् यद्वा किमपि आविष्कृतं, तत्सर्वं पूर्वकालादेवसंस्कृतौ विद्यते।तथा भवन्तः अत्र समागत्य तां वैज्ञानिकीं भाषां पठन्तः सन्ति यया न केवलं भवतः शरीरस्य विकासः भविष्यति अपितु समग्रस्य जीवनस्य विकासः भविष्यति।अतः न केवलमहं पठामि इति भावः भवेत् अपितु अस्माकं मनसि सर्वदा अयं भावः पाठयेम संस्कृतं जगति सर्वं मानवान् भवेदिति।

कार्यक्रमेऽस्मिन् उत्तरप्रदेशसंस्कृतसंस्थानस्य प्रमुखसचिवः जितेंद्रकुमारः, निदेशकः विनयश्रीवास्तवः, सर्वेक्षिका डॉ० चन्द्रकलाशाक्या, प्रशिक्षणप्रमुखः सुधिष्ठमिश्रः, प्रशिक्षणसमन्वयकः धीरजमैठानी दिव्यरंजनः राधा शर्मा च उपस्थिताः आसन् । कार्यक्रमस्य सञ्चालनं संस्थानस्य प्रशिक्षकेन अशोकवर्येण कृतम्।

धन्यवादज्ञापनं प्रशिक्षकेन दीपकपाण्डेयवर्येण शान्तिमन्त्रश्च मीनामहोदयया कृतम्। कार्यक्रमेऽस्मिन् संस्थानस्य सर्वे प्रशिक्षकाः सर्वे प्रशिक्षवश्चोपस्थिताः आसन्। न केवलं अध्येतारः, बालकाः, पुरुषाः एतस्यां कक्षायां पठितुं शक्नुवन्ति, अपितु गृहिण्यः दिव्यचक्षवः अपि कक्षां कर्तुं शक्नुवन्ति । तर्हि शीघ्रं कुर्वन्तु अत्र पञ्जीकरणं-https://sanskritsambhashan.com/।

# राज्यसर्वकारेण क्रियते द्वितीयराजभाषायाः अवनतिः

## -पूर्वसर्वकारेण राज्यस्य माध्यमिकविद्यालयेषु छात्राणां न्यूनसंख्याम् उद्धृत्य अधिशेषप्रक्रियायाः अन्तर्गतं 2600 एलटी-संवर्गस्य पदं निरस्तं कृतम्

उत्तराखण्ड। २०२३ तमस्य वर्षस्य जुलै-मासस्य २१ दिनाङ्के पूर्वनिर्धारितकार्यक्रमानुसारं उत्तराखण्डराज्यस्य द्वितीया राजभाषा संस्कृतशिक्षणेन सह सम्बद्धानां राज्यस्य विभिन्नानां संस्थाप्रमुखानाम् एका महत्त्वपूर्णसभा संस्कृत-एकतामञ्चस्य आश्रयेण आयोजिता।

सर्वविदितं यत् २०१० तमे वर्षे देवभूमि-उत्तराखण्डस्य नाममहत्त्वकारणात् देववाणीसंस्कृतं राज्ये द्वितीयभाषारूपेण गौरवं दातुं राज्यसर्वकारेण विधेयकं पारितम्। परन्तु २०१३ तमे वर्षे तत्कालीनसर्वकारेण राज्यस्य माध्यमिकविद्यालयेषु छात्राणां न्यूनसंख्या उद्धृत्य अधिशेषप्रक्रियायाः अन्तर्गतं २६०० एलटी-संवर्गस्य पदं निरस्तं कृतम् । एतस्मात् कारणात् विद्यालयेषु सर्वेषु विषयेषु द्वयोः मध्ये एकं पदं तथा च भाषायाः (हिन्दी-संस्कृतम्) द्वयोः पदयोः एकं पदं निरस्तं जातम् । ततः परं ९५% माध्यमिकविद्यालयेषु (उच्चविद्यालयेषु अन्तरमहाविद्यालयेषु च) संस्कृतशिक्षणव्यवस्था अप्रासंगिकविषयाध्यापकेषु प्रचलति। विषयाध्यापकानाम् अभावे कला-व्याणिज्य-विज्ञान-गणित-शिक्षकाणां संस्कृतभाषां तात्कालिकरूपेण पाठ्यमानस्य कारणेन विषयाः एकरसाः अरुचिकराः च भवन्ति तथा च उच्चशिक्षायाम् अपि छात्राः संस्कृतविषयान् ग्रहीतुं लज्जन्ते।

द्वितीयराजभाषायाः संस्कृतशिक्षणस्य स्थितिः न केवलं माध्यमिकविद्यालयेषु अपितु राज्यस्य पारम्परिकसंस्कृतविद्यालयेषु महाविद्यालयेषु च अतीव कृपणरूपेण वर्तते। तत्र अपि संस्कृतविद्यालयेषु महाविद्यालयेषु च शिक्षकाणां नियुक्तिः न क्रियते। एतदर्थं संयोजकः बालादत्तशर्मा , संरक्षकः पी0सी0 तिवारी, उत्तराखण्ड-संस्कृतविद्यालयः/महाविद्यालयः प्रबंधकीयशिक्षकसंघस्य (155) अध्यक्षः डॉ0




जनार्दनकैरवाणः , मन्त्री-नवीनपन्तः, उत्तराखण्डसंस्कृतविद्यालयः/महाविद्यालयः प्रबंधकीयशिक्षकसंघस्य (126) अध्यक्षः भगवतीप्रसादबिजल्वाणः , मन्त्री रावेन्द्रकुमारः , श्रीसंस्कृतछात्रसेवासमितिः अध्यक्षः सर्वेशतिवारी, मन्त्री विनोदकुमारः , उत्तराखंडसंस्कृतविश्वविद्यालयछात्रसंघस्य अध्यक्षः सागरखेमरिया ,छात्रसंघसचिवः गिरीशसती , भगवानदास-आदर्श-संस्कृत-महाविद्यालयहरिद्वारस्य अध्यक्षः नितिनलोहनी , उत्तराखण्डहिन्दी-संस्कृत-शिक्षण-मञ्चतः डॉ0 हरिशंकरडिमरी , डॉ0 दीपकनवानी , ऋषिरामबहुगुणा , अर्जुनपाण्डेयः , दीपचन्द्रजोशी अनिलढौडियालः आदयः एकतामन्चे संगठितं भूत्वा भारतीयसंस्कृतेः मूलसंस्कृतभाषायाः सम्बन्धितसमस्यानां निराकरणाय उत्तराखण्डसंस्कृतभारत्याः प्रान्तसङ्गठनमन्त्रीगौरवशास्त्रिणा सह मिलित्वा परिचर्चां कृतवन्तः च समस्यानां विषये उत्तराखण्डसर्वकाराय एकं याचनापत्रं दिसम्बरपर्यन्तं समर्पयिष्यन्ति।

अधियाचनपत्रे माध्यमिकविद्यालयेषु संस्कृतम् अनिवार्यं पदसंरचनं च , संस्कृतविद्यालयेषु / महाविद्यालयेषु १५५ शिक्षकाणां तदर्थनियुक्तिः तथा च १२६ शिक्षकाणां मानदरूपेण समावेशः च वेतनविसंगतिः , मानकनिधरिणं तथा च पदसंरचना वर्तते। अन्यथा सति २०२४ तमस्य वर्षस्य जनवरी-मासस्य प्रथमसप्ताहे संस्कृत-एकता-मञ्चः देहरादून-नगरे आन्दोलनं कुर्वन् सभाम् आगमिष्यति इति सभायां सर्वसम्मत्या पारितम् ।

समागमे उत्तराञ्चलम्संस्कृतभारतीसङ्गठनमन्त्री, उत्तराखण्ड-हिन्दी-संस्कृतशिक्षणमञ्चस्य संयोजकः गौरवशास्त्री,बालादत्तशर्मा, मन्त्री नवीनपन्तः , अध्यक्षः भगवती प्रसादः , छात्रसमितेः विनोदकुमारः , छात्रपरिषदः नितिनलोहनी स्व स्व विचारान् प्रस्तुतवन्तः।

राज्यस्य सर्वकारीय-अशासकीय-प्रबन्धकीय- माध्यमिकविद्यालयेषु संस्कृतपदं विषयम् अनिवार्यं कर्तुं च सर्वकारीय-प्रबन्धकीय-संस्कृत- विद्यालयेषु महाविद्यालयेषु च संस्कृत-भाषा-शिक्षणाय शिक्षकाणां नियुक्तिः तथा च माध्यमिक-शिक्षा-विभागे संस्कृत-भाषायाः त्रिभाषिक-सूत्ररूपेण (हिन्दी, आङ्ग्ल, संस्कृतम्) सर्वेषु संकायेषु अनिवार्यविषयं कर्तुं च एल.टी-प्रवक्तापदम् अनिवार्यरूपेण पूरयितुं बलं प्रदत्तं च संस्कृतं च द्वितीयराजभाषारूपेण महत्त्वसार्थकतायां सर्वकारेण आग्रहितम् , अस्मिन् विषये शीघ्रमेव भौतिकसमागमः प्रस्तावितः।

# “भारतीयसंस्कृतिसंवर्धने राष्ट्रियशिक्षानीतिः”

23/07/2023 दिनाङ्के सायं 4:30 सार्धचतुर्वादने आन्ध्रप्रदेश संस्कृतसंस्कृतिविकाससंस्थानेन “भारतीयसंस्कृतिसंवर्धने राष्ट्रियशिक्षानीतिः २०२०” इति विषये आयोजितायाः द्विदिनात्मिकायाः राष्ट्रिय-ई-संगोष्ठ्याः अनलाईन्-माध्यमेन समापनकार्यक्रमः समभवत्। अस्मिन् समापनसत्रे सम्मानितातिथिरूपेण डाङ्गविकासपरिषदः अध्यक्षाः राजस्थानशासनस्य पूर्वराज्यमन्त्रिणः




श्रीजवाहरसिंहबेढममहोदयाः अभिप्रेरणवचोभिः सर्वान् प्रोत्साहितवन्तः। मुख्यातिथिरूपेण कामेश्वरसिंहदरभङ्गाविश्वविद्यालयः,दरभङ्गा,बिहार इत्यस्य कुलपतयः आचार्याः शशिनाथझामहोदयाः राष्ट्रियशिक्षानीतिः २०२० इत्यस्य परिचयं कृत्वा तत्रस्थ विषायाणां संशोधनं, अनुसन्धानम्, प्रवर्तनम् च इत्येतेषु विषयेषु उपस्थापनं कृतवन्तः। विश्वहिन्दुपरिषदः पूर्वकेन्द्रीयसहमन्त्रिणः श्रीयुगलकिशोरमहोदयाः स्वानुभवैः विभिन्नोपायैः नीतेः विषये उद्बोधितवन्तः। कार्यक्रमस्यास्य अध्यक्षरूपेण तिरुपतिस्थ राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतयः आचार्याः जि.एस्.आ.कृष्णमूर्तिमहोदयाः राष्ट्रियशिक्षानीतिः २०२० इत्यस्य क्रियान्वयः कथं भवितुमर्हतीति विषयम् अधिकृत्य उपस्थितापितवन्तः। कार्यक्रमेऽस्मिन् आचार्याभिः अञ्जुसेठमहोदयाभिः तन्मे मनः शिवसङ्कल्पमस्तु इत्येतैः वचोभिः परिचयात्मकभाषणं दत्तम्, स्वागतभाषणं डा.ए.सच्चिदानन्दमूर्त्तिमहोदयैः, प्रतिवेदनसमर्पणं डा.ए.चारुकेशमहोदयैः, धन्यवादसमर्पणं डा.वै.श्रीनिवाशर्ममहोदयैः., कार्यक्रमस्य सञ्जालनं डा.एस्.वैष्णवीमहोदयाभिः, वैदिकमङ्गलाचरणं डा.दुर्गाशिरणरथमहोदयैः च कृतम्। एवमेव संस्थानप्रार्थना भूपेशतिवारीमहोदयैः कृता। कुलगीतं सङ्कर्षणढक्कालमहोदयैः गीतम्। कार्यक्रमस्य समन्वयकाः डा.लक्ष्मणकुमारमहोदयाः, डा. जयन्तनुनियामहोदयाः, डा बालकरामसारस्वतमहोदयाः च उपस्थिताः आसन्। ऑनलाइन्- द्वारा संगोष्ठ्यां व्यावसायिकाः, शोधकर्तारः, शिक्षाविदः, छात्राः च समापनकार्यक्रमेऽस्मिन् सम्मिलिताः आसन् । सत्रे प्रायः १०० प्रतिभागिनः उपस्थिताः आसन् । शान्तिमन्त्रेण सभेयं समाप्तिं गता।

# उज्जयिन्यां त्रिदिवसीयराष्ट्रिय-शोधसङ्गोष्ठयाः शुभारम्भः

(वार्तासंयोजकः-डॉ. दिनेशः चौबे)

उज्जयिनीस्थस्य महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयस्य वेदव्याकरणविभाग-दर्शनविभागयोः तथा नवदेहलीस्थभारतीयदार्शनिकानुसन्धानपरिषदः संयुक्ततत्त्वावधानेन वैदिकभाषादर्शनमुच्चारणविज्ञानञ्च इति विषयमाश्रित्य समायोजितायाः राष्ट्रियशोधसंगोष्ठ्याः शुभारम्भः षड्विंशे दिनाङ्के प्रातः एकादशवादने महाकालमन्दिरप्राङ्गणस्थे माधनसेवान्यासपरिसरस्य सभागारे सञ्जातः। उद्घाटनसमारोहस्य शुभारम्भः वाग्देव्याः सरस्वत्याः समर्चनेन दीपदीपनेन च जातः। दीपदीपनकाले वैदिकमङ्गलाचरणं डॉ. अङ्कितसांडिल्येन, सरस्वतीवन्दना अनुरूद्धत्रिपाठिना च विहितम्। तदनु विश्वविद्यालयस्य कुलगानं समुपास्थापितम्। उद्घाटनसत्रे मुख्यातिथिरूपेण प्रदेशस्य उच्चशिक्षामन्त्रिणः डॉ.मोहनयादवमहोदयाः समुपस्थिता आसन्। महोदयेन उक्तं यत् संस्कृतभाषया महत्त्वपूर्णज्ञानराशिः उपनिबद्धो वर्त्तते। वैदेशिका अस्या महिम्नः परिचिताः सन्ति। संस्कृतं विज्ञानस्य भाषा अस्ति। संस्कृतेनैव भारतस्य अस्तित्वम् अस्ति। सारस्वतातिथिरूपेण समुपस्थिता आसन् विक्रमविश्वविद्यालयस्य कुलपतयः प्रो. अखिलेशकुमारपाण्डेयमहोदयाः, ते उक्तवन्तो यत् संस्कृतं विज्ञानस्य जननी अस्ति, संस्कृतग्रन्थेषु नानाविधाविष्काराः तत्त्वरूपेण निहिताः वर्त्तन्ते। संस्कृतस्य ज्ञानाभावात् अस्माकं महान् हानिः सञ्जाता। अतः सम्प्रति संस्कृतम् अवश्यं पठनीयम् इति। संगोष्ठ्यां विशिष्टातिथिरूपेण हिन्दी-ग्रन्थ-अकादमी इति संस्थायाः सञ्चालकाः डॉ. अशोककडेलमहोदयाः समुपस्थिता आसन्। वैदिककालादारभ्य संस्कृतस्य भाषावैज्ञानिकत्वं प्रतिपादितवन्तः उद्घाटनसत्रस्य मुख्यवक्तृरूपेण समुपस्थिता आसन् भारतीयदार्शनिकानुसन्धानपरिषदः सचिवाः प्रो. सच्चिदानन्दमिश्रमहोदयाः। स्वकीये बीजवक्तव्ये संस्कृतव्याकरणस्य आदिपरम्परातः शब्दतत्त्वविषये ध्वनितत्त्वविषये च विस्तृतं व्याख्यानं प्रदत्तवन्तो मिश्रमहाभागाः। सभाध्यक्षरूपेण समुपस्थितैः कुलपतिभिः सी. जी. विजयकुमाराचार्यमहाभागैः निगदितं यत् पुनः आधुनिककाले अपि संस्कृतभाषाप्रयोगस्य अनिवार्यता अनुभूयते। अस्माभिः संस्कृतभाषाव्याकरणस्य महत्त्वम् अनिवार्यरूपेण समाजस्य समक्षं प्रतिपादनीयम्। शिक्षाविषयकाः चतुस्त्रिंशत् शिक्षाग्रन्थाः सम्पूर्णानन्दविश्वविद्यालयात् प्रकाशिता इति महद्गौरवस्य विषयः। वैदिकसत्रे मुख्यवक्तृरूपेण प्रो.सदानन्द-त्रिपाठि-महोदयैः सत्रम् उद्बोधितम्, तथा प्रो. इलाघोषमहाभागाभिः सत्रस्य अध्यक्षता कृता। ततो व्याकरणसत्रे मुख्यवक्तृरूपेण प्रो. प्रदीपकुमारपाण्डेयमहोदयैः सत्रम् उद्बोधितम्, प्रो. शैलेन्द्रकुमारशर्ममहोदयैः सत्रस्य अध्यक्षता कृता। उभयसत्रे शोधपत्रवाचकाः शोधपत्रमुपस्थापितवन्तः। अस्याः राष्ट्रियशोधसंगोष्ठ्याः संयोजकेन डॉ. अखिलेशकुमारद्विवेदिमहोदयेन उद्घाटनसत्रे संगोष्ठीप्रस्तावनं स्वागतभाषणं च कृतम्। सत्रसञ्चालनं डॉ.उपेन्द्रभार्गवमहोदयेन, आभारप्रदर्शनं कुलसचिवेन डॉ. दिलीपसोनीमहोदयेन प्रस्तुतम्। संगोष्ठ्यामस्यां विश्वविद्यालयस्य शोधच्छात्राः, नगरस्य गणमान्यजनाः पत्रकाराश्च उपस्थिता आसन्। अन्तिमे कल्याणमन्त्रेण सभा समाप्ता।

# शिक्षावेदाङ्गस्य परम्परा सिद्धान्तश्च

**-डॉ. मणिशंकरद्विवेदी, नवदेहली**

नवदेहल्यां स्थितेन भारतसंस्कृतसमवायेन जुलाईमासस्य त्रिंशतमे दिनांके शिक्षावेदाङ्गम् : परम्परा सिद्धान्तश्चेति विषयकं मासिकं व्याख्यानम् अन्तर्जालमाध्यमेन समायोजितम्। व्याख्यानमिदं प्रयागस्थितस्य इलाहाबादविश्वविद्यालयस्य संस्कृत-पालि-प्राकृतविभागस्य सहायकाचार्येण डॉ.प्रचेतस्-महोदयेन प्रदत्तम्। स्वकीये व्याख्याने तेन प्रतिपादितं यत् भारतीयज्ञानपरम्परायां शिक्षाग्रन्थानां महत्त्वं सर्वत्र प्रतिपादितम्




अस्ति। संहिताभागे ब्राह्मणग्रन्थे आरण्यके उपनिषदि शिक्षायाः दिग्दर्शनम् अस्माभिः कर्तुं शक्यते। वैदिकपरम्परायाम् उच्चारणस्य कृते ग्रन्थद्वयं महत्त्वपूर्णं स्थानं भजते। शिक्षाग्रन्थः प्रातिशाख्यग्रन्थश्च। यदि उभौ ग्रन्थौ उच्चारणम् एव प्रतिपादयतः तर्हि पार्थक्यं कथं जायेत इति धिया विचार्यते यत् शिक्षायां शाखागतोच्चारणस्य सामान्य उच्चारणस्य व्यवस्था भवति परन्तु प्रातिशाख्यग्रन्थे केवलं वेदशाखायाः उच्चारणस्य विषयः अवलोक्यते। ऋग्वेदस्य तैत्तिरीयशिक्षा, शुक्लयजुर्वेदस्य याज्ञवल्क्यशिक्षा, कृष्णयजुर्वेदस्य व्यासशिक्षा, सामवेदस्य नारदीयशिक्षा, अथर्ववेदस्य माण्डुक्यशिक्षा इदानीं पठनपाठने प्रचलिता अस्ति। शिक्षाग्रन्थस्य संख्याविषये महती विप्रतिपत्तिः दृश्यते युधिष्ठिरमीमांसकाः एकशतं शिक्षाग्रन्थाः स्वीकुर्वन्ति, सिद्धेश्वरवर्ममहोदयाः लिखन्ति यत् ते पञ्चषष्ठिः शिक्षाग्रन्थाः अवलोकिताः।

संपूर्णानन्दसंस्कृतविश्वविद्यालयतः यः शिक्षासंग्रहः प्रकाशितः तत्र चत्वारिंशत् एव शिक्षाः सन्तिः। इदानीं पञ्चषष्ठितः सप्ततिः संख्यापर्यन्तं शिक्षाग्रन्थाः समुपलभ्यन्ते।

व्याख्यानेऽस्मिन् विशिष्टातिथिरूपेण विराजमानेन श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य वेदविभागस्य आचार्येण प्रो.देवेन्द्रमिश्रमहाभागेन तैत्तिरीयोपनिषदः शिक्षावल्ल्याः शिक्षासूत्रे प्रतिपादितस्य शिक्षायाः षडङ्गविषये स्वकीयः विचारः प्रस्तुतः। तेन भणितं यत् तैत्तिरीयोपनिषदः शिक्षावल्ल्याम् ऋषिः कथयति यत् ' शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः।' अर्थात् शिक्षावेदाङ्गे वेदमन्त्रस्य वर्णानां, स्वराणां, मात्राणां, बलानां, सामसंतानयोश्च वर्णनं जायते।

कार्यक्रमस्य आध्यक्ष्यं निर्वहद्भिः दिल्लीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षैः प्रो. ओमानाथविमलीमहाभागैः स्वकीये अध्यक्षीये वक्तव्ये शिक्षायाः विषये नैकानि तथ्यानि समुद्घाटितानि। तैः प्रतिपादितं यत् पतञ्जलिः महाभाष्ये लिखति यत् 'लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यति' अस्मिन् वाक्ये शिक्षायाः उल्लेखः न दृश्यते। कथं तर्हि शिक्षा पठनीया उत च उच्चारणस्य विधायिका स्यात्। इति चेत्, भाष्यकारस्य आशयः अनेन प्रकारेण भवति। लोपः, आगमः वर्णविकारश्च। वर्णविकारे एव ध्वनिसिद्धान्तस्य बीजम् अस्ति। शिक्षाग्रन्थे वर्णविकारस्य एव चर्चा जायते।

भारतसंस्कृतसमवायस्य समन्वयका उत जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतप्राच्यविद्याध्ययनसंस्थानस्य आचार्याः प्रो. सन्तोषकुमारशुक्लवर्याः कार्यक्रमे समुपस्थितं वक्तारं अतिथिं, तथा च अध्यक्षेण सह समस्तश्रोतॄन् प्रति भारतसंस्कृतसमवायपक्षतः धन्यवचांसि समर्प्य शिक्षायाः विषयेऽपि प्रतिभागिनम् उद्बोधितवन्तः। तैः कथितं यत् इदानीं निखिलेऽपि विश्वस्मिन् ध्वनिविज्ञानस्य पाठ्यक्रमः प्रचलति। जर्मनभाषायां लैटिनभाषायां संस्कृतभाषायाम् उच्चारणस्य स्थानं मुखं तु समानं परन्तु तत्तत्भाषायां स्वदृष्ट्या उच्चारणस्य व्यवस्था जायते। अस्माकं देशे ध्वनिविज्ञानस्य आधारभूता शिक्षा एव अस्ति। तत्र साम इत्यस्य अर्थः माधुर्यम् अस्ति। वर्णानां मध्यमोच्चारणं साम । अर्थात् मधुरशब्देन यत् उच्चर्यते तत् साम । ध्वनिविज्ञाने मधुरभाषायाः महत्त्वम् अस्ति। शिक्षाग्रन्थः न केवलं वेदशाखायाः अथवा वैदिकोच्चारणस्य आधारः अपितु अस्माकं व्यवहयमाणायाः भाषायाः अपि आधारः।

कार्यक्रमोऽयं श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयस्य वेदविभागीयशोधच्छात्रेण श्रीआशुतोषमणित्रिपाठिना कृतेन वैदिकमङ्गलाचरणेन प्रारब्धः वैदिकशान्तिपाठेन च सम्पूर्णः सञ्जातः। कार्यक्रमेऽस्मिन् देशस्य विविधेभ्यः प्रान्तेभ्यः स्थितेभ्यः विश्वविद्यालयेभ्यः महाविद्यालयेभ्यः उत अन्येभ्यः शैक्षणिकसंस्थानेभ्यश्च अनेके विद्वांसः, शोधच्छात्राश्च सोत्साहं भागं गृहीत्वा संगोष्ठीमं सफलमकुर्वन्।

## केन्द्रीयसंस्कृतविश्वविद्यालयः

संसदः अधिनियमेन स्थापितः
(प्राक्तनं राष्ट्रियसंस्कृतसंस्थानम्, भारतसर्वकारस्य शिक्षामन्त्रालयाधीनम्)
56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली – 110058
दूरभाषसङ्ख्या – 011 -28524993, 28524995, 28520979, 28520966
अन्तर्जालपुटम् - www.sanskrit.nic.in

अधिसूचनायाः संख्या - के.सं.वि./36014/विज्ञापनम्/एस्-III/2023-24/01 दिनाङ्कः – 07/07/2023

**2023-24 वित्तीयवर्षे संस्कृतसंवर्धनयोजनाः उपलक्ष्य वित्तीयसहायतायाः प्रदानार्थम्**
**अन्तर्जालमाध्यमेन आवेदनपत्राणाम् आमन्त्रणम्**

संस्कृतस्य संवर्धनाय केन्द्रीयसंस्कृतविश्वविद्यालयेन सञ्चाल्यमानाः भारतसर्वकारस्य शिक्षामन्त्रालयस्य निम्नलिखिताः केन्द्रीययोजनाः उपलक्ष्य 2023-24 वर्षस्य कृते वित्तीयसहायतायाः प्रदानार्थं नियमानुसारं सर्वकारेतरसंस्थाभिः स्वैच्छिकसङ्घटनैः/संस्थाभिः/विश्वविद्यालयैः/प्रकाशकैः/वैयक्तिकरूपेण/छात्रद्वारा अन्तर्जालमाध्यमेन आवेदन-पत्राणाम् आमन्त्रणं क्रियते –

| क्र. सङ्ख्या | योजनायाः नाम | अन्तर्जालमाध्यमेन पञ्जीकरणम् | |
|---|---|---|---|
| | | आरम्भतिथिः | अन्तिमतिथिः |
| 1 | संस्कृतशिक्षणम् - पारम्परिकसंस्कृतपाठशालासु/महाविद्यालयेषु/सर्वकारीयविद्यालयेषु/चतुष्पाठिसंस्थासु शिक्षणार्थं संस्कृताध्यापकानाम् अथवा आधुनिकविषयकाध्यापकानां व्यवस्था तथा आवासीयच्छात्रवृत्तिश्च । | 10.07.2023 | 08.09.2023 |
| 2 | सम्मानराशिः - अभावग्रस्तपरिस्थितिषु वर्तमानानां संस्कृतपण्डितानां कृते वार्षिकवृत्तिः । | | |
| 3 | संस्कृतसंवर्धनाय कार्यक्रमाः एवं गतिविधयः - विभिन्नसंस्कृतसंवर्धनकार्यक्रमाणाम् आयोजनार्थं वित्तीयसहायता । | | |
| 4 | संस्कृतपुस्तकानां प्रकाशनं सामूहिकक्रयणं दुर्लभग्रन्थानां पुनर्मुद्रणञ्च | | |
| 5 | शास्त्रचूडामणिः - संस्कृतशास्त्रशिक्षणार्थं शास्त्रविदुषाम् अथवा सेवानिवृत्तानां संस्कृतविदुषां सेवानाम् उपयोगः । | | |
| 6 | व्यावसायिकप्रशिक्षणम् - पञ्जीकृतासु पारम्परिकसंस्कृतसंस्थासु अध्ययनरतानां छात्राणां कृते व्यावसायिकप्रशिक्षणम् । | | |
| 7 | अष्टादशी - संस्कृतसंवर्धनाय अष्टादशपरियोजनाः । (निर्धारितक्षेत्रेषु एव आवेदनीयम्) | | |
| 8 | छात्रवृत्तिः - पारम्परिक-आधुनिकधारासु नियमितरूपेण नवमीकक्षातः विद्यावारिधिपर्यन्तं संस्कृतम्/पालिं/प्राकृतम् अधीयानेभ्यः छात्रेभ्यः छात्रवृत्तिः । | 10.07.2023 | 31.10.2023 |

उपर्युक्तानां योजनानां कृते आवेदनं केवलम् अन्तर्जालमाध्यमेनैव (Online mode only) स्वीक्रियते । अन्येन माध्यमेन प्राप्तानि आवेदनानि न स्वीक्रियन्ते । परन्तु प्रत्येकं योजनायाः दिशानिर्देशानुसारं प्रकाशनसामग्र्यः/पुस्तकानि/अनिवार्यपत्राणि सक्षमाधिकारिणा प्रमाणितस्य अन्तर्जाले प्रपूरितस्य आवेदनपत्रस्य प्रतिलिप्या सह पृथग्रूपेण पञ्जीकृतपत्राचारमाध्यमेन (Registered Post 20.09.2023 दिनाङ्काभ्यन्तरे "निदेशकः (केन्द्रीययोजनाः), (.....योजनायाः नाम....), केन्द्रीयसंस्कृतविश्वविद्यालयः, 56-57, सांस्थानिकक्षेत्रम्, जनकपुरी, नवदेहली -110058" इति पत्रसङ्केतं प्रति प्रेषणीयानि भवन्ति । आवेदनपत्रस्य प्रपूरणात् प्राक् योजनानां दिशानिर्देशाः अवश्यं पठनीयाः । प्रत्येकं योजनायाः दिशानिर्देशाः, आवश्यकपत्राणि, मानदेयराशिः, अन्तर्जालमाध्यमेन आवेदनप्रक्रिया, आवेदनपत्रस्य अग्रेसरणप्रक्रिया इत्यादीनां विषये विस्तृतज्ञानार्थं केन्द्रीयसंस्कृतविश्वविद्यालयस्य अन्तर्जालपुटं www.sanskrit.nic.in/schemes अवलोक्यन्तु । योजनायाः नियमानुसारं विगतवर्षेषु प्राप्तानाम् आवेदनानां स्वतः नवीनीकरणं न सम्भवति । अतः प्रत्येकं योजनायाः अन्तर्गततया वित्तीयसहायतां प्राप्तुं प्रतिवर्षं पृथग् रूपेण आवेदनं कर्तव्यम् । आवेदनानां स्वीकृतिः अथवा तिरस्कृतिः धनस्य उपलब्धताम् आधारीकरोति । अतः प्रत्येकं योजनायाः अन्तर्गतस्य वित्तीयसहायतायाः निमित्तं पृथक्तया आवेदनं समर्पणीयं भवति । कस्याः अपि योजनायाः विषये स्पष्टीकरणार्थम् अथवा संशयनिवारणार्थम् उपरि प्रदत्तदूरभाषसङ्ख्यया अथवा पत्राचारसङ्केतद्वारा उत ई-मेल help.schemes@csu.co.in माध्यमेन वा सम्पर्कयितुं शक्नुवन्ति ।

हस्ता/-
निदेशकः (केन्द्रीययोजनाः)

# कारगिल-विजेतृयोद्धृणाम् अदम्यसाहसः सदैव संस्मरणीयः - विनयश्रीवास्तवः

लखनऊ। उत्तरप्रदेशशासनाधीनेन उत्तरप्रदेशसंस्कृतसंस्थानेन, लखनऊस्थेन संचालित भाषा शिक्षण कक्षाणां प्रतिपुष्टि सत्रं विजय दिवसरूपेण समायोजितः। यत्र निदेशकः विनय श्रीवास्तवः अमर हुतात्मनाम् अदम्य साहसं संस्मरन् श्रद्धांजलिं प्रदत्तवान्। सत्रे संस्थानस्य पदाधिकारिषु दिनेशमिश्रः,जगदानंदझा, चंद्रकलाशाक्या च विजयदिवसीयायै भारतीय वीरतायै श्रद्धांजलिं प्रदत्तवन्तः। आभाषिक पटले आयोजिते अस्मिन् सत्रे योजनसंचालन गणस्य अनिलगौतमः, धीरजमैठाणी,दिव्यरञ्जनः,राधाशर्मा इत्येतैः सहिताः सर्वे शिक्षकाः एवं च शिक्षार्थिनः उपस्थिताः आसन्।

## पाठकानां कृते सूचना

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवनं सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**
**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

# सम्पादकीयम्

सम्मान्याः सुरभारतीसमुपासकाः!

सादरं नमोनमः।

वैदिक युगस्य आर्याणां संस्कृतिं सभ्यतां च ज्ञातुं वेदाः एव एकमात्रं साधनम्। मानव जातिः विशेषतः वैदिकाः स्वीयधर्मस्य समाजस्य च कथं विकासः कृतः, अस्य ज्ञानं केवलं वेदेभ्यः एव प्राप्यते। विश्वस्मिन् अयं प्राचीनतमः ग्रंथः मान्यते। वेदः लौकिकस्य परलौकिकस्य च ज्ञानस्य ग्रंथः। वेदः ऋषि परंपरायाः आलोकः अतः सत्य दृष्टा कथ्यतेस भारतीय आध्यात्मिक ग्रंथानाम् उत्पत्तिः वेदेभ्यः एव अभूत्, ये गीता उपनिषद् महाभारतं रामायणम् इत्यादिभिः नामभिः ज्ञायन्ते स वेदव्यासः वेदान् संकलितान् विधिबद्धान् च कर्तुम् अत्यन्तं कठिनकार्यम् अकरोत्। वेदानां पठन-पाठनेन विचारिकः ज्ञानरूपसंसारः प्रकाशितः भवति। वेदः भारतीय समाजस्य न, अपितु विश्वस्य समाजाय अपि कल्याणकारी उद्धारकश्च स वेदेषु व्यक्तिगतं ,पारिवारिकं, सामाजिकं, राष्ट्रियम् एवं च अन्तर्राष्ट्रियं प्रशासनिकव्यवस्था परस्परसंबंध : इत्येतैः विषयैः संबद्धविस्तृतं ज्ञानं पूरितं विद्यते स वेदानाम् उत्पत्तिः सृष्टेः आदितः मान्यते स मानवस्य प्रथमसंततये श्रुति रूपेण चतुर्णां ऋषीणां द्वारा ईश्वरः इमां विद्यां प्रदत्तवान् स ततः एव इयं श्रवण परंपरा समारब्धा। तेन सममेव ताम्रपत्रन, भोजपत्रं इत्येषाम् अनन्तरं कार्गदानां पत्रेषु पुस्तकरूपेण मानव समाजाय उपलब्धा। वस्तुतः वेदः समस्तानां सत्य विद्यानां ग्रंथः क्षेत्रीयजनपर्यन्तं न सीमितः अपितु अयं ज्ञान सूर्य प्रकाशः इव समस्त सृष्टि पोषणाय एवं च कल्याणाय च विद्यते स वेद मंत्राणां तत्वं ज्ञातुम् अस्माभिः उपनिषदाम् अध्ययनम् अवश्यं करणीयम् स यतः प्रज्ञा शक्त्या उपनिषद् इत्यादयः अस्मभ्यं भाष्यं, कथा, प्रसंगः, उद्धरणं इत्येतान् अवगंतुं प्रदत्तम् स स्वाध्यायेन बिना वेदानाम् अर्थावगमनं कठिनम् स अर्ध अध्ययनस्य एवं च सीमित ज्ञानस्य कारणेन अद्य समाजे वेदः रहस्यभूतः। अतः अस्माभिः तदा स्वाध्यायेन जिज्ञासया च सममेव वेद मंत्राः पठनीयाः, पाठनीयाः, अवगमनीयाः, अवगामनीयाश्च।

भवदीया

सम्पादिका

**॥ वेद वाणी ॥**

'अध स्मा ते चर्षणयो यदेजानिन्द्र त्रातोत भवा वरूता ।
अस्माकासो ये नृतमासो अर्य इन्द्र सूरयो दधिरे पुरो नः ।।
एवा न स्पृधः समजा समत्स्विन्द्र रारन्धि मिथतीरदेवीः ।
विद्याम वस्तोरवसा गृणन्तो भरद्वाजा उत त इन्द्र नूनम् ।।'

'O !Mighty Lord Indra! Protect all those who tremble with great fear. Guide them in crossing their difficulties. Uplift them. Protect also those who are the best of leaders of our society. And guard those worshippers who place wise priests foremost in performance of their sacred rituals.""O! Lord Indra! Inspire us to vanquish our enemies in battlefield. Destroy completely the malevolent forces conspiring against us. Bestow upon Bharadvajas among us, who always worship you, with good dwellings and ample food.'

The Rig Veda 6.25.7&9

'उरुं नो लोकमनु नेषि विद्वान्स्वर्वज्ज्योतिरभयं स्वस्ति ।
ऋष्वा त इन्द्र स्थविरस्य बाहू उप स्थेयाम शरणा बृहन्ता।।'

'O! Lord Indra,! You are the most wise. Conduct us to the wide,spacious and favourable world of heaven. Bless us with a state of radiance, happiness, fearlessness and well-being. O! Ancient Lord! May we come and seek the shelter of protective and mighty arms of Yours.'

The Rig Veda 6.47.8

**संकलन : एस.वासुदेव रावः**

# हृद्गतं कन्याभ्रूणस्य

-डॉ. मञ्जुठेमदेवः चन्ने
केन्द्रीयसंस्कृतविश्वविद्यालयः
एकलव्यपरिसरः, अगरतला, त्रिपुरा

'भोः मातः! मां न मारयतु, न मारयतु। अहं जीवितुं वाञ्छामि। इदं सुन्दरं जगत् द्रष्टुमिच्छामि।' एवमहं कस्यचित् भ्रूणस्य पुनरेकवारं करुणक्रन्दनम् अशृण्वम्। तच्छ्रुत्वा मया सह यज्जातमासीत् तत्स्मृतिपथमागतम। यतः जगतः क्रौर्यं मया इतःपूर्वमनुभूतमासीत्।

तद्दिने, आं तद्दिने मयापि एवमेव आक्रन्दनं कृतमासीत्। न केनापि श्रुतम्। मे मातापि तत्र विरोधं कुर्वती आसीत्। परन्तु सा राक्षसी निर्दया क्रूरा च धनलोभिनी वैद्या तस्यै सूच्यौषध ं प्रदाय अचेतनत्वं प्रापितवती। हन्त! क्षणाभ्यन्तरे सर्वं शान्तम्।

वस्तुतः कियती आनन्दिता आसमहं यदा मातुः उदरे प्रविष्टा। भगवता इदं रमणीयं विश्वं द्रष्टुं मह्यम् अवसरः प्रदत्त इति वारं वारं तं प्रति कृतज्ञताम् आविष्कृतवती।

माता अपि अतीव प्रसन्ना आसीत्, नूतनसदस्यागमनं भवेदिति विचिन्त्य। किन्तु यथा यथा मातुः कुक्षौ वर्धमाना अभवं तथा तथा मद्गृहे पुत्रः वा पुत्री वेति चर्चा समारब्धा।

'अये, अस्माभिः गर्भलिङ्गपरीक्षणं विधातव्यम्। यदि पुत्रः स्यात्तर्हि गर्भवर्धनाय अवसरः प्रदेयः। परन्तु पुत्री भवेत्तर्हि गर्भपातः कर्तव्यः। यतो हि कन्या तु परकीयधनमेव। तस्याः परिपालने महान् धनव्ययः। अस्मद्गृहे वंशसंवर्धकः पुत्र आवश्यकः, न तु धनस्य व्ययकर्त्री पुत्री'ति।

यथा उच्यते खलु-

एकेनापि सुपुत्रेण जायमानेन सत्कुलम्।
शशिना चौव गगनं सर्वदैवोज्ज्वलीकृतम्।।

वंशश्रीतिलकीभूतः कुलदीपकः खलु पुत्रः। पुत्री किं वा कुर्यात् इदं सर्वं शृण्वती मे माता तु छिन्नहृदया सञ्जाता। कथं मे गृहसदस्या एवं दयाहीनाः भवितुमर्हन्ति तेषामेव अंशः खलु ममोदरे वर्धते इति चिन्तयित्वा तत्र सा विरोधं प्रादर्शयत्।

मम शरीरस्य एकोऽवयवः। मया नैव छिन्नं क्रियते। मातृहृदयं किल मे। पुत्रः वा पुत्री वेति मत्कृते द्वयोः समानता। पुत्रः कुलदीपकः, पुत्री तु कुलघातिनीति विचारः अद्यतनीये वैज्ञानिके युगे नैव शोभते। कन्या अपि अद्यत्वे परिश्रमं कृत्वा कुलकीर्तिं सर्वत्र प्रसारयति।

यथा-प्रियदर्शिनी इन्दिरा गान्धिः, प्रतिभा पाटिलः, सरोजिनी नायडूः, सुषमा स्वराजः, अन्तरिक्षविहारिणी कल्पना चावला, भारतस्य कोकिला लता मंगेशकरः, बचेन्द्री पालः, किरणबेदी, अरुन्धती रायः, आरती साहा, निर्मला सीतारमणः, मैरी कॉमः, अरुणिमा सिन्हा, शीतलमहाजनः, एम्. एस् सुब्बुलक्ष्मीः चेति नारीणां शृङ्खला एव दृष्टिपथमायाति। आभिः सर्वाभिः स्वीयविशेषगुणैः विभिन्नक्षेत्रेषु गौरवपूर्णं कार्यं विहितमस्ति। न केवलं समाजहितम्, अपि तु देशहितमपि साधितम। सभ्याः सामाजिकाः तासां कार्यं प्राशंसन्। साम्प्रतमपि राष्ट्रपतिपदे एका महिला विराजते इति सर्वजनविदितमेव।

वस्तुतः अद्यत्वे सर्वेषु क्षेत्रेषु कन्याः एव आधिक्येन अग्रेसरत्वं भजन्ते। एवं सत्यमपि स्थितौ इयं पुत्रीति मत्वा गर्भपातः नाम कस्यचित् जीवस्य हत्या एव। महापापेषु हत्या अपि अन्यतमम्। मया तु तथा नैव विधीयते। अहं भ्रूणहत्यां नैव करिष्ये।

परञ्च गृहसदस्याः तस्याः अभिप्रायम् इच्छां वा अविगणय्य बलात् वैद्यसमीपं नीत्वा लिङ्गपरीक्षणं कारितवन्तः। तत्र तैरवगतं यदोदरे कन्यारूपगर्भः तिष्ठतीति। तदारभ्य ते गर्भपाताय मातरं बहुधा प्राचोदयन्।

गच्छता कालेन तृतीयमासः समारब्धः। मम तु लघु लघु अवयवाः स्पष्टरूपेण दृश्यन्ते स्म। एकस्मिन् दिने-

श्वश्रूः - अधुना अधिकविलम्बो न कार्यः। सत्वरमेव कार्यं साधनीयम्। नो चेत् कन्यायाः जन्म निश्चितमेव।

ततश्च गृहजनाः 'अधुना बलात् माता वैद्यसमीपं नेतव्ये'ति निर्णयमकुर्वन्। तामनुक्त्वा 'वयमद्य भ्रमणाय गच्छामः' इति छलेन चिकित्सालयम् अनयन्। यदा माता चिकित्सालयं प्रविष्टा तदा तया अवगतं यत् मम गर्भपाताय इमे सर्वे अत्र आनीतवन्त इति।

वैद्या - इदं कर्म कर्तुं मया अधिकं धनं स्वीक्रियते। ऋते धनात् तत्सर्वं नैव शक्यम्।

पिता - दीयते अस्माभिः। त्वया कार्यमिदं सत्वरं समापनीयं तावदेव।

'अहं मदीयकार्यं प्रामाणिकतया करिष्ये। लोकानां जीवनरक्षणं मे आद्यकर्तव्यम्। तस्य पालनं मया सर्वदा सर्वकालेषु क्रियते इति प्रतिजाने' इति वैद्यकीयक्षेत्रे प्रवेशसमये प्रतिश्रुतमासीत् वैद्यया। परन्तु केवलं धनलोभेन सा पूर्वं स्वीकृतं वचनं विस्मृतवती। अहो, धनलोभः वैद्यायाः।

ततश्च वैद्यया निर्दयत्वं प्रदर्श्य क्रूरतया मात्रे चेतनाप्रबाध कं सूच्यौषधं प्रदत्तम। क्षणाभ्यन्तरे एव सा अचेतनत्वं गता। किन्तु तदानीं त्वहं जीविता आसं नु। तारस्वरेण तामहं न्यवेदयम् -

'त्वमपि एका स्त्री खलु। एवम् अपरायाः स्त्रियः जीवनं नाशयितुं केनाधिकारः प्रदत्तोऽस्ति। अयं तु महापराधः। मयापि जीवितव्यमस्ति। उत्तमं कार्यं कृत्वा मातुः कीर्तिः कुलख्यातिश्च सर्वदिक्षु प्रसारणीया वर्तते। समाजस्य देशस्य च सेवां विधाय कीर्तिहेतुः भवितुमिच्छामि। मातुः मम च स्वप्नपूर्ततां करिष्यामि। जानाति नु, लोकेऽस्मिन् 'वैद्याः ईश्वररूपा' इति मन्यन्ते। तस्मात् प्रार्थयेऽहं तेषां विश्वासघातं मा करोतु। मां न मारयतु। मा मारयतु भोः। कृपया, दयावती भव। वैद्यप्रतिज्ञां स्मर।'

एवङ्कारेण आक्रन्दनं कृतवती। किन्तु मम ध्वनिः न तया श्रुतः। क्षणाभ्यन्तरे एव तया मम प्राणाः पञ्चत्वं प्रेषिताः।

खेदस्य विषयोऽयं यत् वयमस्मिन् वैज्ञानिके युगे आत्मानम् आधुनिकमिति मन्यमानाः एवं शूद्रं विचारं कुर्म इति। एवमेव भवति चेत् स्त्रियः सङ्ख्या परिमिता भविष्यति। भगवदिच्छाविरुद्धः व्यवहारस्तु समाजहानिं जनयिष्यति। अतः जनजागरणम् अनिवार्यम। आगच्छन्तु सम्भूय उद्घोषणां कुर्मः -

**कृत्वा नवदृढसङ्कल्पम्-**
**वितरन्तु नवसन्देशम्।**
**भ्रूणहत्या हि महापापम्**
**कन्यारक्षणं पुण्यप्रदम्।।**

-------------------------

# कर्मयोगी

हिन्दीमूलम् : डॉ. योगेन्द्रनाथः शुक्लः
संस्कृतरूपान्तरम् : डॉ. अर्चना जोशी

जीर्णशीर्णपरिधूसरवसनावेष्टितः, श्यामवर्णः सः, तस्य स्कन्ध प्रदेशे लघुस्यूतकं हस्ते च वंशी, यथैव स श्रेल श्यानस्य तस्मिन् प्रकोष्ठे समागतः, आकस्मिकापतनेन सम्मुखस्थितो युवा कुपितो जातः-

"किम् भोः! अन्धोऽसि वा? कथं सम्यक् दृष्ट्वा न चलसि?"

"बन्धो! क्षमस्व! श्सूरदासो" हि अहम् । कृपया किञ्चित् अग्रेगमनाय मे साहाय्यं करोतु । भवते सुखं भूयात् भगवत्कृपया।"

स युवा दयार्द्रा जातः, तस्य हस्तमवलम्ब्य प्रकोष्ठस्य मध्ये तमानीतवान्। तेन अन्धयूना वेणुः अधरे संस्थापितः, वेणुवादनं च आरब्धम्।

ष्यत्र कुत्रचित् स्वच्छन्दाः तिष्ठन्ति एते वराकाः भिक्षार्थम् ।"

ष्अयि, छाद्यिकाः खलु एते भवन्ति । अवतरं प्राप्य यात्रीणां सर्वमपि वस्तुजातं गृहीत्वा पलायन्ते ।"

तस्य कर्णमापतितानि ईदृशानि वचनानि किन्तु न हि तस्य साध नायां किञ्चिदपि अवरोधो जातः । स तु तन्मयोऽस्ति वंशीवादने । जनाश्च मन्त्रमुग्धाः इव स्थित्वा शृण्वन्ति । यथैव वंशीरव उपरतः, जनाः "साधु, साधु" इत्युक्त्वा तस्मै धनदानाय उद्युक्ताः।

श्श्रीमन्तः ! सूरदासोऽस्म्यहम् (अन्धः खल्वहम् ) नाहं भिक्षुकोऽस्मि । अहं तु वंशीनिर्माणं तद्विक्रयं च करोमि।"

तस्य वचनानि श्रुत्वा सर्वेषां नेत्राणि विस्मयेन विस्फारितानि इव। तस्य वंशीयस्य विक्रयं जातम्।

स सर्वान् साञ्जलिं प्रणाममकरोत् ।

यथैव 'रेल' यानमवस्थितः सोऽवतरितः प्रकोष्ठात्, कर्मयोगं शिक्षयितुं रेलयानस्य अपरे प्रकोष्ठे प्रविष्टश्च ।

# भारतीयजैनज्ञानपरंपरा....



-प्रो.अनेकांतकुमारजैनः
(आचार्यः ,जैनदर्शनविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रिय- संस्कृतविश्वविद्यालयः,
नवदेहली -16
संपर्कः - 9711397716 ,anekant76@gmail.com )

भारतीयसभ्यतायाः आदिकालादेव जैनधर्मदर्शनस्य अस्तित्वस्य प्रमाणानि उपलभ्यन्ते । जैन आगमानुसारेण जैनधर्मः अनादिकालतः प्रवाहमानः । जैनमान्यतानुसारेण भूतकाले भिन्न चतुर्विंशतिः तीर्थङ्कराः आसन् , वर्तमानकाले ऋषभादि चतुर्विंशतिः तीर्थङ्कराः सन्ति तथा च भविष्यत्कालेऽपि चतुर्विंशतिः तीर्थङ्कराः भविष्यन्ति। भारतीयवाङ्मयस्य प्राचीनतायाः निर्देशकाः ग्रन्थाः ऋग्वेदादयः वेदाः सन्ति । तेष्वपि व्रात्यानां वर्णनं उपलभ्यन्ते,ते वस्तुतः जैनश्रमणाः एव सन्ति । उपनिषत्सु यत्र तत्र अपि श्रमणानां चर्चा उपलभ्यते । वेदेषु जैनतीर्थकराणां मुख्यतः ऋषभदेवस्य अजितनाथस्य अरिष्टनेमेः च वर्णनं प्राप्यते । भारतगणतन्त्रस्य पूर्वराष्ट्रपतयः विश्वप्रसिद्धदार्शनिकाश्च डॉव सर्वपल्ली राधाकृष्णमहोदयाः अपि लिखन्ति-

'There is evidence to show that so far back as the first century B.C. there were people who were worshipping Zcabhadeva, the first trthaEkara. There is no doubt that Jainism prevailed even before Vardhamna or Prœvantha. The Yajurveda mentions the name of three TrthaEkaras-Zcabha, Ajitntha and Aricmanemi. The BhgavataPurGa endorses the view that Zcabha was the founder of Jainism.(Indian philosophy Vol I Page 287)

वैदिककालात् व्रात्यपरम्परायाः प्रमाणानि उपलभ्यन्ते,अतः ज्ञायते यत् जैनधर्मः विश्वस्य एकं प्राचीनतमं दर्शनमस्ति। मोहनजोदडो-हडप्पा-सभ्यतासु ध्यानमग्नयोगिनं तीर्थङ्कराणां मूर्तयः उपलभ्यन्ते । येन ज्ञायते यत् भारतीयपरम्परायां जैनध्यानयोगस्य प्रतिपादनं प्राचीनं विद्यते ।

प्राचीनकाले जैनधर्मस्य अभिधानं व्रात्यधर्मः इत्यपि आसीत् । न केवलं जैनसाहित्यं अपितु वैदिकसाहित्ये, पुराणे बहुशः उल्लिखितमस्ति यत् अस्माकं देशस्य अभिधानं भारतवर्षमिति ऋषभदेवस्य ज्येष्ठपुत्रभरतस्य नाम्ना एव विख्यातं आसीत् । ऋषभदेवानन्तरं त्रयोविंशतितीर्थंकराः संजाताः तेषु अन्तिमः तीर्थंकरः भगवान् महावीरः अस्ति । येन अखिलविश्वे जैनधर्मस्य पुनः प्रवर्तनं कृतं । चतुर्विंशतितमः तीर्थंकरमहावीरः विशिष्टता धारयति स्म,यैः सर्वेभ्यः जीवेभ्यः आध्यात्मिकोन्नतेः प्राणिमात्रहिताय शान्तेः धर्मनिरपेक्षतया च शिक्षा प्रदत्ता।

तीर्थंकरभगवतः महावीरस्य शिक्षा अद्यापि तथैव महत्त्वपूर्णा प्रासंगिका च अस्ति यथा तेषां समये षड्द्विसहस्त्रवर्षपूर्वं(२६००) आसन् । तैः मुख्यरूपेण या शिक्षा प्रदत्ताः तासु मुख्याः सन्ति अहिंसा, अनेकान्तवादः, अपरिग्रहवादश्च । तैः सर्वदा सत्यानुसन्धानस्य प्रेरणा प्रदत्ता । तैः उपदिष्टं यत् अस्माभिः सत्यस्य साक्षात्कारः करणीयः।

दर्शनान्तरेषु जैनदर्शनं नास्तिकमिति प्रतिपादितमस्ति,तस्य च कारणं वेदानां प्रामाण्य स्वीकाराभाव एव । किन्तु एतद् विषये 'नास्तिक' शब्दो न युज्यते । यतो हि 'अस्ति नास्ति दिष्टं मतिः' इत्यनुसारं नास्ति दिष्टमिति मतिरस्ति यस्य स नास्तिक इत्येवार्थ शब्दोऽयं कथयति ,तदनुसारं च परलोकसत्तां स्वीकुर्वाणा आस्तिका अन्ये च नास्तिका इति वक्तुं युज्यते ।जैनदर्शनं तद्विषये नास्ति मौनभाक् ,अतो नास्ति नास्तिकं जैनदर्शनमित्येव साधीयः। अतैव अवैदिकदर्शनमिदं इति वक्तुं शक्यते।

**प्राकृतागमाः ( साहित्यम् )**

सम्पूर्णजैनागमाः विषयदृष्ट्या चतुःषु अनुयोगेषु विभक्ताः सन्ति

(1) प्रथमानुयोगः- अस्मिन् अनुयोगे महापुरुषाणां चरित्रसम्बन्धिताः ग्रन्थाः, पुराणाः, कथादयः साहित्याः सम्मिश्रिताः सन्ति।

(2) करणानुयोगः - करणानुयोगस्यान्तर्गते लोकालोकस्य विभागः चतुर्गति-स्वरूपाणां प्रतिपादकाः भूगोल-खगोल-गणित, गुणस्थान-कर्मसिद्धान्तादि-विषयकाः सिद्धान्तग्रन्थाः सम्मिलिताः सन्ति।

(3) चरणानुयोगः - अस्मिन् चरणानुयोगे श्रमणानां श्रावकाणां च तेषां आचारविषयक प्रतिपादकाः ग्रन्थाः सम्मिलिताः सन्ति।

(4) द्रव्यानुयोगः- अत्र जीवाजीवादीनां तत्त्वानां, जीवपुद्गलादीनां, षड्द्रव्याणां, आध्यात्मप्रधान विषयोपयुक्तः प्रतिपादकाः तत्त्वज्ञाने दार्शनिकाः तथा आध्यात्मिकाः ग्रन्थाः समाविष्टाः सन्ति।

तीर्थङ्करमहावीरस्य मूलप्रवचनं प्राकृतभाषायां आगमसाहित्येषु संकलिताः सन्ति। आगमाः मूलरूपेण द्वादशाङ्गेषु विभक्ताः सन्ति। तद्यथा (१)आचाराङ्गसूत्रम् (२) सूत्रकृताङ्गम् (३) स्थानाङ्गसूत्रम् (४) समवायाङ्गसूत्रम् (५) भगवतीसूत्रम् (६) ज्ञातधर्मकथा (७) उपासकदशा (८) अन्तकृतदशा (९) अनुत्तरोपपादिकदशा (१०) प्रश्नव्याकरणम् (११) विपाकसूत्रम् (१२) दृष्टिवादः ।

द्वादशोपाङ्गसूत्राणि सन्ति-(१) उववाई, (२) रायपसेणी, (३) जीवाभिगमः, (४)प्र ज्ञापना, (५) जम्बूद्वीपप्रज्ञप्तिः, (६) चन्द्रप्रज्ञप्तिः , (७) सूर्यप्रज्ञप्तिः, (८) निरयावलिका, (९) कप्पवडिसीया,( १०) पुप्फीया, (११) पुप्फचुलीया, (१२) वह्निदशा ।

चत्वारि छेदसूत्राणि सन्ति -(१) व्यवहारसूत्रम्, (२) बृहद्कल्पः, ( ३) निशियसूत्रम्, (४) दशाश्रुतस्कन्धः ।

चत्वारि मूलसूत्राणि सन्ति-(१) दशवैकालिकः, (२) उत्तराध्ययनम् , (३)नन्दीसूत्रम् , (४) अनुयोगद्वारम् ।

अन्ते द्वात्रिंशत्तमम् आवश्यकसूत्रम् वर्तते। श्वेताम्बर स्थानकवासिसम्प्रदायेन, तेरापन्थीसम्प्रदायेन च एतानि द्वात्रिंशत् सूत्राणि जैनागमः कथ्यते । श्रीश्वेताम्बरेण मूर्तिपूजकेन जैनसमाजेन द्वात्रिंशत्सूत्रेषु अन्यानि त्रयोदश सूत्राणि सम्मेलितानि । ते पञ्चचत्वारिंशत्सूत्राणि आमनन्ति । तेषु सूत्रेषु अङ्गोपाङ्गानि तथैव आमनन्ति । ते मूलसूत्रेषु आवश्यकसूत्रम् अपि गणयन्ति । तदुपरान्ते चतुर्षु मूलसूत्रेषु पिण्डनिर्युक्तिं, ओधनिर्युक्तिं च अपि गणयन्ति । ते चतुर्षु छेदसूत्रेषु महानिशीथं, पञ्चकल्पं च अपि गणयन्ति । अन्ते दश प्रकरणसूत्राणि अपि सन्ति -(१) आतुरप्रत्याख्यानम्, (२) भक्तिपरीक्षा, (३) तन्दुलवैचारिकः, (४) चन्द्रवेदेयकः, (५) देवेन्द्रस्तवः, (६) गणिविद्या, (७) महाप्रत्याख्यानम्, (८) चतुःशरणम्, (९) श्रीस्तवः, (१०) संस्तारकः।

**संस्कृतसाहित्यम्**

जैनसंस्कृतकाव्यसाहित्ये किं वा अस्ति? इति बहवः विद्वान्सः पृच्छन्ति। यद्यपि एषः प्रश्नः अज्ञानमूलः। जैनसंस्कृतसाहित्ये किं नास्ति? इति आधिकारिकतया प्रतिप्रश्नं कर्तुं विदुषां सामर्थ्यं न भवति अतएव जैनसंस्कृतसाहित्यस्य एतादृशी स्थितिः वर्तते।

जैनसंस्कृतसाहित्यस्य अध्ययनेन ज्ञायते यत् संस्कृतवाङ्गमये तस्य स्थानमतिविशिष्टमिति । संस्कृतसाहित्यस्य कायसंवर्धने जैनपरम्परायाः अतिविशिष्टं योगदानमस्ति । जैनाचार्यैरपि समस्त प्राचीनभाषाभिः सह संस्कृत-भाषायां विशालं साहित्यं निर्माय, संस्कृतभारत्याः विकासे अद्वितीयं योगदानं दत्तम् । संस्कृतभाषायां परिनिबद्धस्य जैनसाहित्यस्य प्राचुर्यं वरीवर्तिते । जैनाचार्यैः ध र्मदर्शनातिरिक्तं काव्य-कोश-छन्दोलङ्कारख्ज्यौतिष- आयुर्वेद-मुद्राशास्त्र-व्याकरण-नाट्यशास्त्र-नीतिशास्त्र- आचारशास्त्रवास्तुकला-प्रभृतिविषयानासृत्य समस्तविधासु श्रेष्ठतमं विपुलग्रन्थाः रचिताः ।

अत्र समस्तविधासु केवलं काव्यविधायां विशेषरूपेण महाकाव्यम्, संधानमहाकाव्यम्, एकार्थकाव्यम्, दूतकाव्यम्, खण्डकाव्यम्, सूक्तिकाव्यम्, गद्यकाव्यम्, चम्पूकाव्यम्, नाट्यविधानाञ्च प्रमुख-शास्त्राणं नामोल्लेखमात्रं संक्षेपेण अवश्यमेव कर्तुं इच्छामि।

महाकाव्येषु आचार्यः रविषेणकृतं 'पद्मचरितम्', जटासिंह नन्दिद्वारा निर्मितं 'वारांगचरितम्', वीरनन्दि कृतं 'चन्द्रप्रभचरितम्', अज्ञातकर्तृकं 'वर्धमानचरितम्', महाकविः असगकृतं 'शान्तिनाथचरितम्', महासेनकृतं 'प्रद्युम्नचरितम्', आचार्यः वादीराजकृतं 'पार्श्वनाथचरितम्', आचार्यः हेमचन्द्रप्रणीतं 'कुमारपालचरितम्' नामकं द्वयाश्रयमहाकाव्यम्, महाकविःहरिचन्द्रप्रणीतं 'धर्मशर्माभ्युदय महाकाव्यम्', महाकविः बाग्भट्टप्रणीतं 'नेमिनिर्माण महाकाव्यम्', द्वितीयगुणभद्रकृतं 'धन्यकुमारचरितम्', महाकविः अमरचन्द्र कृतं 'बाल भारतम्' तथा च 'पद्मानन्दमहाकाव्यम्' इति प्रमुखाणि महाकाव्यानि सन्ति । ऐतिहासिक काव्येषु महाकविः सर्वानन्दस्य 'जगडू चरितम्' तथा नयचन्द्रसूरिकृतं 'हम्मीर महाकाव्यम्' अतिमहत्त्वपूर्णानि महाकाव्यानि सन्ति ।

संधानकाव्येषु महाकविः धनञ्जयस्य 'द्विसंधानमहाकाव्यम्' संधानविधायाः प्रथमं जैनमहाकाव्यम् अस्ति। अथ च सूराचार्यकृतं 'नाभेयनेमि', 'द्विसंधान महाकाव्यम्' शान्तिराजप्रणीतं 'पञ्चसंधानमहाकाव्यम्' मेघविजयोपाध्याये निर्मितं 'सप्तसंधानमहाकाव्यम् उपलब्धानि सन्ति । सप्तसंधानमहाकाव्येषु तीर्थंकरः ऋषभदेवः , शान्तिनाथः, नेमिनाथः, पार्श्वनाथः , महावीरः तथा रामचन्द्रः च श्रीकृष्णः इत्येषां सप्तशलाकापुरुषाणां चरितं एकं सहैव निबद्धमस्ति।

एकार्थककाव्येषु वादीदेवसिंहसूरिकृतं 'छत्रचूडामणि' नामकं काव्यमतीव लोकप्रियमस्ति । तथैव धनेश्वरसूरिकृतं 'शत्रुञ्जयमहात्म्यं महाकाव्यम्', कविः जयशेखरसूरिकृतं 'जैनकुमारसंभवम्' प्रमुखानि काव्यानि सन्ति । संदेश अर्थात् दूतकाव्येषु आचार्यः जिनसेनप्रणीतं 'पर्श्वाभ्युदय' काव्यम् , कविः विक्रमरचितं 'नेमिदूतकाव्यम्', कविः मेरुतुङ्गकृतं 'जैनमेघदूतं', वादीचन्द्रसूरिकृतं 'पवनदूतम्' आदि लोकप्रिय-दूतकाव्यानि सन्ति ।

"गद्यं कवीनां निकषं वदन्ति" इत्युक्तनयेन गद्यकाव्यनिर्माणे कवीनामद्वितीयैव प्रतिभा दृश्यते । संस्कृतसाहित्ये यद्यपि कादम्बर्यादीनि गद्यकाव्यानि सुप्रसिद्धान्येव तथापि-अनतिप्रसिद्धानां बहूनां गद्यकाव्यानां परिशीलनमावश्यकम् । गद्यकाव्येषु जैनकविभिः लिखितं 'गद्यकाव्यम्' गद्यकाव्यानां अतिश्रेष्ठपरम्परा अस्ति । एषु नवमशताब्द्यां आचार्येण वादीभसिंहसूरिणा प्रणीतं 'गद्यचिन्तामणि' नामाभिहितं अत्युत्कृष्टं गद्यकाव्यमस्ति । संस्कृतस्य अनतिप्रसिद्धेषु तथाविधेषु गद्यकाव्येषु 'गद्यचिन्तामणिः' इत्याख्यं काव्यमद्वितीयम् । नाम्नैव ज्ञायते यदिदमेकं गद्यकाव्यमिति । कविना पण्डित वादीभसूरीना समग्रमपि काव्यमिदं प्रौढशैल्यां विरचितम् । संस्कृतसाहित्ये प्रकृतिवर्णननिपुणः कविः भवभूतिरेव। परन्तु गद्यचिन्तामणौ यादृशं प्रकृतिवर्णनं दृश्यते, तादृशमन्यत्र विरलतया द्रष्टुं शक्यते । गद्यचिन्तामणेः कादम्बर्याश्च मध्ये महदेव सादृश्यं वरीवर्ति । तथा च कादम्बर्याः शुकनासोपदेशं को वा विस्मरति? तद्वदेव गद्यचिन्तामणावपि आर्यनन्देः उपदेशः प्रसिद्धः ।

तथैव एकादशशताब्द्यां समुत्पन्नेन महाकविः धनपालेन कृतं 'तिलकमञ्जरी' महाकाव्यमपि उत्कृष्टं काव्यमस्ति ।

चम्पूकाव्येषु महाकविना सोमदेवसूरिणा प्रणीतं 'यशस्तिलकचम्पूमहाकाव्यम्' तथा महाकविः हरिचन्द्रकृतं 'जीवन्धरचम्पूकाव्यम्', अर्हदास कृतं 'पुरुदेवचम्पूकाव्यं' च अत्युत्कृष्टं चम्पूकाव्यानि सन्ति।

संस्कृतनाट्यसाहित्यस्य विकासेपि जैनाचार्यैः महत्त्वपूर्णयोगदानं कृतम् । एषु प्रमुखरूपेण 'विबुधानन्दनामकं' नाटकं शीलाङ्काचार्येण लिखितमस्ति । महाकविना रामचन्द्रेण प्रायः नवसंख्यकासंस्कृतजैनरूपकाणां रचना कृता । तेषु सत्यहरिश्चन्द्रम्, नव विलासः, कौमुदीमित्रानन्दम् तथा 'यादवाभ्युदयम्' अति प्रसिद्धानि रूपकाणि सन्ति । अपि च महाकविः हस्तिमल्लेन 'विक्रान्तकौरवम्', 'मैथिली-कल्याणम्', 'अञ्जनापवनञ्यः' तथा 'सुभद्रानाटिका' - इति चत्वारि अतिश्रेष्ठानि नाटकानि निर्मितानि ।

एवं प्रकारेण जैनाचार्यैः संस्कृतसाहित्यस्य विकासे महत्त्वपूर्णं योगदानं कृतम् । जैनाचार्येण प्रणीतं दार्शनिकं, सैद्धान्तिकं, तात्त्विकं, आध्यात्मिकं, आयुर्वेदः, ज्योतिषं, व्याकरणं, गणितं, कोशः, छन्दादि विविधसाहित्यविषयेषु विपुलमात्रायां साहित्युपलभ्यन्ते ।

संस्कृतालङ्कारसाहित्ये वाग्भटकवेः काव्यालङ्कारस्य हेमचन्द्राचार्यस्य च काव्यानुशासनस्य प्रमुखं स्थानमस्ति । धनञ्जयस्य 'नाममाला' हेमचन्द्राचार्यस्य च 'अभिधानचिन्तामणिः' कोशस्य क्षेत्रे विशिष्टं स्थानमधिकुरुतः। ज्यौतिषसाहित्ये भद्रबाहुभट्टारकस्य निमित्तशास्त्रेत्याख्यग्रंथो विशिष्टमस्ति । महावीरस्य गणितसारसंग्रहस्य गणितक्षेत्रे अतिशयवैशिष्ट्यमस्ति ।

जैनसंस्कृतसाहित्यैपि सन्ति नामाधुनाप्यनेके ग्रन्थाः येषां विषये वयमनभिज्ञाः यतोहि एतेषां ग्रन्थानाम मूलपाण्डुलिपयः ग्रन्थागारेषु स्थिताः सन्ति । यदा तासां अनुसन्धानं संपादनं प्रकाशनं भविष्यति तदा अवश्यमेव संस्कृतसाहित्याकाशे नूतन आयामस्य समुद्घाटनं भविष्यति। यद्यस्माकं अनुसन्धानस्य उद्देश्यः संस्कृतसाहित्यस्य अज्ञातग्रन्थानां प्रकाशनमस्ति तर्हि अस्मभ्यं जैनसंस्कृतसाहित्येषु सन्ति विशालक्षेत्रम् यतोहि संस्कृतभाषायां जैनमनीषिभिः विविधविषयकं साहित्यं प्रणीतमिति जैनसंस्कृतसाहित्यसागरो ह्यपरम्पारः ।

**दार्शनिकसाहित्यम्**

प्रथमशताब्दि ईस्वीकाले जैनाचार्यः उमास्वामिना तत्त्वार्थसूत्रस्य रचना संस्कृतभाषायां विहिता । तत्त्वार्थसूत्रोपरि काले काले वृत्तिभाष्यादिभिर्विभूषितानि ग्रन्थान्तराणि प्राप्यन्ते ।

आचार्येण कुन्दकुन्देन प्राकृतभाषायां समयसार-प्रवचनसार-नियमसार-पञ्चास्तिकायः- अष्टपाहुड नामकाः ग्रन्थाः विरचिताः । कुन्दकुन्दाचार्यस्य इमा रचनाः समेकितरूपेण जैनदर्शनस्य विश्वकोश इति मन्यते । द्वितीयशताब्द्यां आचार्यसमन्तभद्रोऽपि जैनदर्शनस्य क्षेत्रे अभिनवं चिन्तनं प्रस्तुतवान् ।अस्य रचनासु आप्तमीमांसा, युक्त्यनुशासनम्, स्वयम्भूस्तवः

शेषभागःषष्टमपुटे

पंचमपुटस्य शेषभागः

## भारतीयजैनज्ञानपरंपरा

जिनस्तुतिशतकम्, रत्नकरण्डक-श्रावकाचारः, तत्त्वानुशासनम्, गन्धहस्तिमहाभाष्यं चेति प्रमुखाः रचनाः सन्ति ।आचार्यः सिद्धसेनदिवाकरः न्यायावतार-सन्मतितर्क- तत्त्वार्थटीका-प्रभृतीनां ग्रन्थानां रचनां कृतवान्।

षष्ठशताब्द्यां तत्त्वार्थसूत्रमधिकृत्य आचार्येण देवनन्दिना अपरनाम पूज्यपादाचार्येण सर्वार्थसिद्धिरित्याख्या टीका उपलभ्यते। सप्तमशताब्द्यां भट्ट-अकलङ्केन तत्त्वार्थसूत्रोपरि राजवार्तिकग्रन्थस्य प्रणयनं कृतम् । न्यायविनिश्चयः प्रमाणसंग्रहश्चापि अकलङ्कस्यैव जैनन्यायशास्त्रीयं रचनाद्वयं वर्तते । अष्टमशताब्द्यां हरिभद्रसूरिणाऽपि षड्दर्शनसमुच्चय-अनेकान्तवाद-जयपताकादयो ग्रन्था विरचिताः । आचार्यविद्यानन्देन नवमशताब्द्यां तत्त्वार्थसूत्रोपरि श्लोकवार्तिकं विरचितम्। वादिराजसूरिणाऽपि अस्यामेव शताब्द्यां पार्श्वनाथचरितम्, न्यायविनिश्चयश्चेति द्वौ ग्रन्थौ सृजितौ।

दशमशताब्द्या अनन्तरं अवान्तरकालस्य प्रारम्भः स्वीक्रियते।आचार्यप्रभाचन्द्रः परीक्षामुखसूत्रग्रन्थोपरि अत्यन्तविस्तृतं टीका प्रमेयकमलमार्तण्डस्य रचना कृता । देवसूरिणाऽपि जैनन्यायक्षेत्रे प्रमाणनयतत्त्वालोकालङ्कारः इत्याख्यस्य ग्रन्थस्य रचना कृता । द्वादशशताब्द्यां हेमचन्द्रेण काव्यव्याकरणयोः क्षेत्रे नूतनं साहित्यं सृष्टम् । प्रमाणमीमांसा हेमचन्द्रस्य सुप्रसिद्धा रचनाऽस्ति । विभिन्नविधासु रचनायाः कारणात् हेमचन्द्रः 'कलिकालसर्वज्ञः' इत्युपाधिमधिगतवान्।

त्रयोदशशताब्द्यां मल्लिषेणसूरिणः 'स्याद्वादमञ्जरी' विरचिता । जैनदर्शनक्षेत्रे एषा रचना पर्याप्तं लोकप्रियतामाप्तवती । इयं रचना हेमचन्द्रकृतस्य 'अन्ययोगव्यवच्छेद' इत्याख्यस्य द्वात्रिंशिकाग्रन्थस्य टीका विद्यते। पञ्चदशशताब्द्यां गुणरत्नेन हरिभद्ररचितं षड्दर्शनसमुच्चयं लक्ष्यीकृत्य टीकाग्रन्थो रचितः । सप्तदशशताब्द्यां च आचार्येण यशोविजयेन संस्कृतप्राकृत हिन्दीभाषासु अनेकेषां खण्डनमण्डनात्मकानां ग्रन्थानां सृजनं विहितम्। जैनतर्कभाषाऽस्या प्रमुखा कृतिरस्ति। एवं जैनदर्शन-साहित्य-सिंहावलोकनेन विज्ञायते यज्जैनदर्शनस्य आचार्या न्यायशास्त्रस्य गहनं ज्ञानम् अधिगतवन्त आसन् । अत एव तेषां भाषायां न्यायशैल्याः पूर्णः प्रभावो दृश्यते । ग्रन्थानाम् उपादेयतया सह भाषागतं वैशिष्ट्यमपि तत्र स्पष्टं प्रतिभाति ।

**प्रमुखसिद्धान्ताः**

जैनागमेषु जैनदर्शनस्य बहवः सिद्धान्ताः प्रतिपादिताः। तेषु रत्नत्रयं,अहिंसा ,अनेकान्तवाद-स्याद्वादः तथा च अपरिग्रहः इति विश्वप्रसिद्धाः सन्ति ।

**रत्नत्रयं-मोक्षमार्गः**

आध्यात्मिकसाधनायां जैनदर्शने त्रीणि मोक्षसाधनानि-सम्यग्दर्शन-ज्ञान-चारित्राणीति सन्ति । एतानि त्रीणि साधनानि जैनधर्मे रत्नत्रयमित्येतेन नाम्ना प्रथितानि सन्ति। रत्नत्रयमेव मोक्षमार्गः अस्ति । तत्त्वार्थसूत्रे प्रथमं सूत्रमस्ति - सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः। तत्त्वार्थश्रद्धानं सम्यग्दर्शनम् । येन येन प्रकारेण जीवादयः पदार्था व्यवस्थितास्तेन तेनावगमः सम्यग्ज्ञानम्। सम्यग्ज्ञाने नयप्रमाणविकल्पपूर्वको जीवादिपदार्थानां यथार्थावगमः भवति । स्वरूपे चरणं चारित्रम् । स्वात्मनि प्रवृत्तिरित्यर्थः। यः सम्यग्ज्ञानयुक्तपुरुषः संसारकारणनिवृत्तिं उद्यतोस्ति सः कर्मादाननिमित्तभूतं समस्तक्रियोपरमः भूत्वा हिंसानृतचौर्येभ्यो मैथुनसेवापरिग्रहाभ्यां च पापप्रणालिकाभ्यो विरतिः स्वीकरोति तथा स्वरूपे रमणं करोति । एतत् भवति सम्यग्चारित्रम् । अत्र सम्यग्विशेषणस्य प्रयोगः अज्ञानपूर्वकं आचरणस्य निवृत्त्यर्थं कृतम् । अत्र मार्गः एकैव अस्ति तथा सम्यग्दर्शनज्ञानचारित्राणि एते त्रीणि तस्य मार्गस्य सोपानानि सन्ति । सम्यग्दर्शनेन विना ज्ञानम् चारित्रम् च सम्यक् न भवति ।

**अहिंसा**

जैनदर्शने अहिंसा यावत् विस्तृतसूक्ष्मगहनरूपेण विवेचिता तावत् व्यावहारिकरूपत्वमपि प्रदत्तम्। अतः सर्वप्रथमं हिंसायाः स्वरूपं प्रगटीकृतम् 'प्रमत्तयोगात्प्राणव्यपरोपणं हिंसा। अर्थात् प्रमादयोगपरिणतिसद्भावात् कस्यापि जीवस्य घातो वधो वा हिंसा तथा च हिंसापरित्याग एव अहिंसा । क्रोधमानमायालोभादिकषाययुक्तः रागादिभावसहितश्च परिणामः प्रमादः। एतैः प्रमादैः सह मनोवचनकायानां काभिः प्रवृत्तिभिः क्रियाभिर्वा स्वस्य परस्य वा द्रव्यप्राणान् भावप्राणान् वा घातं पीडनं वा हिंसा भवति । तद्विरतिः अहिंसा । वस्तुतो हिंसा-अहिंसा प्रत्येकस्य जीवस्य परिणामस्योपरि अवलम्बिते। तदनुसारेण यः कोऽपि सार्वभौमरूपेण मनोवचनकायैः कृतकारितानुमोदनैश्च परिपूर्णरूपेण पालयति, तदेव अहिंसामहाव्रतम्, तत्पालनं श्रमणः (मुनिः) करोति। यदि गृहस्थ एकदेशरूपेण पालयेत् तर्हि स श्रावकः कथ्यते, तदेव अहिंसाणुव्रतमुच्यते ।

श्रावकाय अहिंसाव्रतं व्यावहारिकं कर्तुं हिंसायाः विभाजनं चतुर्षु विभागेषु कृतम्। येन गृहस्थ निज धर्मसमाजपरिवाराराष्ट्रादिविषयेषु दक्षो भवेत्, कर्तव्यविमुखो न स्यात् तथा निजश्रावकधर्मं सम्यक् परिपालयन् क्रमात् विकसन् अणुव्रततो महाव्रतं पर्यन्तं विकासयात्रां कृत्वा आत्मकल्याणं कुर्यात्।

**अनेकान्त- स्याद्वादः**

अनेकान्तपदे द्वौ शब्दौ स्तः, अनेकः (न एकः अर्थात् बहुः )+ अन्तः (धर्मः गुणः वा )। एकवस्तुनि वस्तुत्वनिष्पादक-परस्परविरुद्धशक्तिद्वयप्रकाशनमनेकान्तः उच्यते। अनेके अन्ता धर्माः सामान्यविशेषपर्याया गुणा यस्येति सिद्धोऽनेकान्तः। अनेकान्तसिद्धान्तानुसारेण वस्तुनि परस्परविरुद्धाः अनेक गुणधर्माः स्वभावतः विद्यमानाः सन्ति ,एतत् वस्तुस्वरूपम्।

परस्परं विरोधिस्वरुपा अनन्तधर्माः गुणाः वा अवलोकनार्थं तावन्त्य एव दृष्ट्यो भवितव्याः। हठाग्रहात् यदि एकेनैव पक्षेण वस्तुनः सत्यतत्त्व पश्येत् तर्हि तत्र केवलं स्वमतसंग्रह एव भवेत् तथा परमतखण्डनं स्यात्। अनेकान्तो वैचारिकक्षेत्रेषु प्रसृतां हिंसां अपकर्षति। अद्य वैज्ञानिकयुगे वयं जानीम एव, पदार्थोऽचेतनो भवतु वा चेतनो वा, अनन्तगुणधर्मशक्तीनां संग्रहितोऽखण्डरूपात्मकोऽस्ति। तस्य अनन्तशक्तिषु धर्मेषु च केचित् परस्परसहयोगिनः, तथैव परस्परविरोधिनोऽपि ।

अहिंसायाः जीवननिर्वहणार्थं परिपालनार्थं च वैचारिकमतमतान्तराणां दूरीकरणार्थं जैनधर्मे अनेकान्तसिद्धान्तः प्रतिपादितः। अनेकान्तवादो वस्तुतत्त्वपरक-वैज्ञानिकानुभवाधारेण प्रवर्तते, यो मानवेभ्यः उदारः सम्यग्दृष्टिश्च प्रयच्छति। प्रत्येकेषु वस्तुषु अनन्तगुणधर्मा विद्यन्ते। तेषां विविधा दृष्ट्यो वर्तन्ते। नाना जीवा विभिन्नाभिर्दृष्टिभिः वर्णयन्ति, यतः सत्यं न कस्यापि धर्मस्य मानवस्य वा वैयक्तिकस्वामित्वं। सर्वेषां कथनं सहिष्णुतापूर्वकं श्रोतव्यं तथा यया अपेक्षया वर्णितं, सा अपेक्षा अवगन्तव्या, तदर्थं प्रयतितव्यम्। अस्माकं स्थूलविरोधकथनमपि केनापि पक्षेण सम्यक् भवितुं शक्नोति। अत उदारतायुक्तं समन्वयमतिना तत्कथनं श्रोतव्यं विचारः कर्तव्यश्च । तथा सति कदाग्रहः, हठवादः, पक्षपातश्चेति लवलेषमपि नास्ति। सकलपारस्परिक विवादस्य परिहरणार्थं अमोघ उपायः, यतः अनेकान्तवादानुसारेण परस्परविरुद्धावभासात्मक सापेक्षद्वयसत्यं केनापि पक्षेण सत्यमेव वर्तते। अनेन विचारेण पारस्परिकसंघर्षो विवादो वा न जायते।

अनेकान्तवादस्य वचनशैली स्याद्वादः वर्तते द्य द्वयोः मध्ये वाच्य-वाचक संबन्धः अस्ति। 'स्याद्वादः' इत्यस्य पदे द्वौ शब्दौ स्तः , स्यात् (कथञ्चित् ) + वादः (कथनं) अर्थात् सापेक्षदृष्ट्या कथनं। अनेकान्तविचारधारया प्रभावितो मनुजो यत् कथनं करोति, स एव स्याद्वादोऽस्ति । निजकथनमेव पूर्णतः सत्यं अपरेषां वचनं सर्वथा असत्यमिति एकान्तरूपेण नैव वदति । सापेक्षत्वमेव स्याद्वादस्य रहस्यम्। एतेनैव सत्यज्ञानं निरूपणं च शक्नोति। स्याद्वादसिद्धान्ते ' स्यात् अस्ति घटः' ईदृशः सप्तभङ्गमाध्यमेन वस्तुस्वरूपस्य प्रतिपादनं भवति।

**अपरिग्रहवादः**

जैनधर्मः प्रतिपादयति - मूर्च्छा (आसक्तिर्वा) परिग्रहः । तत्परित्याग एवापरिग्रहः। एतदर्थं प्राप्तसम्पतः वस्तूनां समविभाजनं परमावश्यकम्। समविभाजनं विना कस्यापि जीवस्य मुक्तिर्नास्ति। एतस्मिन् सामाजिकस्यार्थिकस्य समत्वस्य अपि तत्त्वमन्तर्निहितम्।

गृहस्थधर्मेऽपरिग्रहव्रतस्य तात्पर्यार्थः-

यत्र कस्मिन्नपि कार्ये मर्यादितसाधनाधारेण कार्यं परिपूरयति, तत्रामर्यादितानावश्यकसाधनानां संग्रहो मूर्खत्वमेव। यत्र अनावश्यकरूपेण संगृहणीयात्, तत्र शोषणं विषमत्वं चायाति। यतः संग्रहणाय सहजीविनां शोषणमुत्पीडनमनैतिकत्वं चावलम्बते। अतः जैनदर्शने परिग्रहसिद्धान्तस्य अतीवमहत्त्वपूर्णं प्रतिपादितं तथा श्रावकस्यापरिग्रहाणुव्रताय परिग्रहपरिमाणव्रतमिति नामधेयं प्रदत्तम्।

वस्तुतो जैनदर्शनस्याचारविचारा आत्मानमनुलक्ष्यिणः। "अप्पा सो परमप्पा" आत्मैव परमात्मा इत्येवाध्यात्मस्य मूलाधारः। आत्मवादिजैनदर्शने वीतरागतायाः प्रधानत्वं परमात्मस्वरूपस्य प्राप्त्यर्थम्। जैनदर्शनानुसारेण रागद्वेषा एव संसारमार्गौ वीतरागत्वमेव मोक्षमार्गश्च। मोक्षमार्गः सम्यग्दर्शन-सम्यग्ज्ञान-सम्यक्चारित्रात्मकरत्नत्रयस्य एकरूपत्वेन संप्राप्नोति। अध्यात्मभूमौ जीवनस्यचरमविकास एव जैनसंस्कृतेरन्तिमलक्ष्यः। समीचीनसुखप्राप्तिरेव जीवनध्येयः। आत्मस्वातंत्र्यादेव सुखमिदमवाप्नोति। कर्मबन्धनयुक्तसंसारिजीवो नावगन्तुं शक्नोति। जगति इन्द्रियजन्यसुखमेव सत्यार्थसुखमिति मन्यते। जैनदर्शनं इन्द्रियातीन्द्रियसुखयोर्भेदविज्ञानं दर्शयित्वा निःश्रेयसोमार्गं प्रेरयति।

## ॥श्रीमहेन्द्रनाथाय नमः॥



असाध्यरोगहारक स्वभक्तभीतिवारक
महाविपन्निवारक प्रचण्डमृत्युमारक।
समस्तसिद्धिकारक प्रशस्तभूतिधारक
प्रसीद हे महेन्द्रनाथ लोकमङ्गलं कुरु॥1॥

-डॉ.शैलेशकुमारतिवारी

( प्रसीद हे महेन्द्रनाथ वाञ्छितं प्रदेहि मे॥॥)

निपालभूमिपालशाहदेववंशचन्दिर-
महेन्द्रवीरविक्रमेण निर्मिते सुमन्दिरे।
सरोवरे मनोहरेऽतिविस्तृते विराजित
प्रसीद हे महेन्द्रनाथ सर्वमंगलं कुरु॥2॥

विहारराज्यभूषणे सिवानमण्डले वरे
महेन्द्रनाथधामनि स्थिते बृहत्- सरोवरे।
निमज्जतेऽत्र चर्मरोगमुक्तिदात्मजादिद
प्रसीद हे महेन्द्रनाथ लोकमङ्गलं कुरु॥3॥

यथा महेन्द्रभूपतेरसाध्य- कुष्ठवारणं
कृतं तथा विधीयतां जगद्-व्यथानिवारणम्।
प्रजाधिभौतिकाधिदैविकादितापपीडिता
प्रसीद हे महेन्द्रनाथ सर्वमंगलं कुरु ॥4॥

जनोऽधुनाऽसुरायते स्वकर्मतःपलायते
निषिद्धनिन्द्यकर्मणा च दुःखभाग् विजायते।
प्रबोधय प्रबोधय प्रसुप्तसूरिसज्जनान्
प्रसीद हे महेन्द्रनाथ लोकमङ्गलं कुरु॥5॥

तवानुकम्पया तपन्ति वह्निभास्करादयः
तवानुकम्पया लसन्ति दिव्यदेवतादयः।
तवानुकम्पया जना भजन्ति भव्यवैभवं
प्रसीद हे महेन्द्रनाथ सर्वमङ्गलं कुरु॥6॥

तवानुकम्पया नृणां भवन्ति भुक्तिमुक्तयः
तवानुकम्पया नृणां भवन्ति सर्वसिद्धयः ।
तवानुकम्पया विना न किञ्चिदत्र सम्भवि
प्रसीद हे महेन्द्रनाथ लोकमङ्गलं कुरु॥7॥

प्रसीद लोकपालपालक प्रसीद शंकर
प्रसीद कालकाल रक्षसां द्विषां भयंकर।
प्रसीद देवदेव देववृन्दवन्द्य सर्वद
प्रसीद हे महेन्द्रनाथ सर्वमङ्गलं कुरु॥8॥

प्रथमपुटस्य शेषभागः

## प्रत्येकं निवासी भारतोस्ति,....

एकादशेन्द्रियाणां राजा अस्ति। किन्तु तत् चञ्चलमस्ति। अतः अन्यानीन्द्रियाणि यथेच्छन्ति तथा कारयन्ति। एतस्मादेव कुण्ठा, अवसादः, व्यग्रता, क्रोधः, आत्महत्येत्यादीनां घटनाः श्रूयन्ते। अतः अभ्यास-वैराग्याभ्यां मनोनिग्रहं कर्त्तव्यम्। यस्य मनो नियन्त्रितं भवति सः विचारशीलो भवति, सोर्जुनोस्ति। यः विचारहीनो भवति सः दुर्योधनोस्ति।

गोष्ठ्याः समारम्भः राजस्थानतो वटुकमोहितशर्मणः वैदिकमङ्गलाचरणेन वाराणसीतः ज्योत्स्ना-शमीकशुक्लबालयोः गीताश्लोकपाठेन सह अभूत्। वाचिकं स्वागतं प्रास्ताविकञ्च आयोजकविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः, समन्वयकः, राष्ट्रपतिसम्मानितः प्रो. धनञ्जयवासुदेवद्विवेदी वर्यः कृतवान। अन्ते धन्यवादज्ञापनं आयोजकमहाविद्यालयस्य संस्कृतविभागाध्यक्षः डॉ. प्रभातकुमारसिंहवर्यः कृतवान। गोष्ठ्याः सञ्चालनदायित्वं संयोजकः सम्पादितवान्। अस्याः सजीवप्रसारणम् आमुखपटलस्य विश्वसंस्कृतकुटुम्बकम् नामके समूहे आसीत्।

अवसरेस्मिन् प्रो.पी.एन.डोंगरे, प्रो.भगवत् शरणशुक्लः, प्रो. वन्दना पाण्डेया, प्रो.सुनीता जायसवाल, प्रो.रामविनयसिंहः, आचार्य आनन्दवर्धनदुबे, डॉ. प्रदीपदीक्षितः, डॉ. अवनीन्द्रपाण्डेयः, डा. सुशीलपाण्डेयः,साहित्येन्दु जी, डॉ.अंशुलदुबे, डॉ. पवनपाण्डेयः, डॉ. लक्ष्मीनारायण पाण्डेयः, डॉ. भास्करद्विवेदी, डॉ. जगदम्बा प्रसाद, ललिता सिंहल, रमेशचन्द्रा, अखिलानन्द उपाध्यायप्रभृतयः द्विशतं श्रोतारः प्रतिभागिनः। डॉ. गीता शुक्ला, डॉ. अरविन्दकुमारतिवारी, डॉ. उमाकान्तशुक्लः, डॉ. आभाद्विवेदी प्रभृतिसंयोजनसमितिसदस्याः सम्मिलिता आसन्।

# नैषधमहाकाव्ये ज्योतिषशास्त्रस्य सिद्धान्तानां वर्णनम्

-ज्ञानेश्वर शर्मा, ज्योतिषाचार्यः
गोरक्षनाथराजकीयसंस्कृतमहाविद्यालयः
नाहनम्

ज्योतिषं सूर्यादिग्रहाणां बोधकं शास्त्रम्, अर्थात् यस्मिन् शास्त्रे सूर्यादिग्रहाणां गतिसम्बन्धिनः सर्वे नियमाः प्रतिपाद्यन्ते तथा च तेषां ग्रहाणां भौतिकपदार्थेषु यत् प्रभावो भवति, तस्य यत्र वैज्ञानिकरीत्या विवेचनं विविच्यते तच्छास्त्रं ज्योतिषमिति।

**तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यम्बुगोलकाः।**
**प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिप्रदीपिताः॥**[1]

इति सिद्धान्तेनऽऽकाशे सूर्य एव तेजसां गोलकस्तदितराणि सर्वाण्यपि ग्रहबिम्बान्यनुज्ज्वलानि सन्ति, तानि च सूर्यकिरणानां प्रभावेणैवरात्रौ समुज्ज्वलानि दृश्यन्ते। चन्द्रबिम्बस्य रविबिम्बादल्पत्वात् चन्द्रबिम्बोपरि रविकिरणां पातेन सूर्याऽभिमुखमर्धाधिकं बिम्बं शुक्लमर्धाल्पं च स्वच्छायान्तर्गतो भवतीति। शुक्लत्वकृष्णत्वयोः कारणं प्रदर्शयन्नुपमाऽनुप्रासयोः शोभा सिद्धान्तशिरोमणौ दर्शनीयमस्ति।

**तरणिकिरणसंगदेषपीयूषपिण्डः दिनकरदिशि चन्द्रश्चन्द्रिकाभिश्चकास्ति।**
**तदितरदिशि बालाकुन्तलश्यामलश्रीर्घट इव निजमूर्तिच्छाययैवाऽऽतपस्थः॥**[2]

एवं प्रकारेण अमुं सिद्धान्तमवलम्ब्यैव नैषधचरिते महाकविनास्य सन्निवेशः कृतः। **यथाहि-**

**रथादसौ सारथिना सनाथाद राजावतीर्याशु पुरं विवेश।**
**निर्गत्य बिम्बादिव भानवीयात्सौधाकरं मण्डलमंशुसंघः॥**[3]

राजानलः सारथिना सनाथात् रथादवतीर्य कुण्डिननगरीं तथा प्रविष्टः यथा सूर्यबिम्बाद् निर्गत्य सूर्यरश्मिः सौधाकरमण्डले प्रविशति। अत्र उपमायाः आधारः ज्योतिषसिद्धान्तः। पुनः **''क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतः''**[4] इति वराहोक्त्यनुसारं क्षीणचन्द्रः, सूर्यः, मंगल, शनिः एवं पापग्रहयुक्तबुध : पापग्रहाः भवन्ति। तत्र कृष्णपक्षस्य त्रयोदश्युपरान्ताद् तथा च शुक्लपक्षस्य द्वितीयातिथिं यावत् चन्द्रः यवनमतेन क्षीणत्वेन स्वीकृतः। अस्यैवान्तर्भावः नैषधे इत्थं दृश्यते -

**विरहिवर्गवधव्यसनाकुलं कलय पापमशेषकलं विधुम्।**
**सुरनिपीतसुधाकमपापकं ग्रहविदो विपरीत कथा कथम्॥**[5]

अत्र विरहिण्या दमयन्त्योच्यते यत् दैवज्ञैः यद् क्षीणचन्द्रस्य पापत्वं, पूर्णचन्द्रस्य च शुभत्वं यदुक्तं तद् विरुद्धमेव, यतोहि संपूर्णचन्द्रः विरहिणां वधे सदैव तत्परो दृश्यते। अतः दैवज्ञानामनुभवविरोधादग्राह्यमेतद्वाक्यमिति भावः।

पुनः ग्रहणप्रसंगे ज्योतिषशास्त्रे भूगोलच्छायेव राहुत्वेन उक्ता। वस्तुतः आकाशे न कुत्राऽपि राहुकेत्वोर्बिम्बे दृश्येते, अतो दिग्देशकालाऽऽवरणादिभेदादेव[6] छादको राहुश्चन्द्रमाच्छादयति, तेन च तद् ग्रहणं संजायते, इति गोलविज्जनाः एव स्वीकुर्वन्ति। मतस्यास्य समाधानं कुर्वता भास्कराचार्येणोक्तं यत् -

**राहुः कुभामण्डलगः शशांकं शशांकगश्छादयतीनबिम्बम्।**
**तमोमयः शम्भुवरप्रदानात् सर्वागमानामविरूद्धमेतत्॥**[7]

अर्थात् शम्भुवरप्रदानात् तेमोमयः राहुर्भूभामण्डले गत्वा चन्द्रं तथा च चन्द्रमण्डले गत्वा सूर्यमण्डलमाच्छादयतीति यदि स्वीक्रियते, तदैतत् सर्वागमानामविरूद्धं भविष्यति। मतस्यास्य खण्डनं लल्लेन, श्रीपतिना, भट्टकमलाकरादिभिः कृतम्। नैषध काव्ये तु भास्कराचार्यस्य मतं विलक्षणतया एव दर्शितम्

**भूगोलच्छायमायागणितविदुन्नेयकायो भियाऽभू**
**देतत्कीर्तिप्रतानैर्विधुभिरिव युधे राहुराहूयमानः॥**[8]

पुनः विवाहप्रकरणसन्दर्भे गुणोचिते ग्रहाणामुदयास्तरहिते च लग्ने एव विवाहः कथितः।

यतो हि -

**गुरोरस्ते पतिं हन्याच्छुक्रास्ते चौव कन्यकाम्।**
**चन्द्रे नष्टे उभौ हन्यात्तस्मादस्तं विवर्जयेत्॥९**

पुनः ग्रहाणामुदयास्त ज्ञानं कथं भवेत्। इति प्रश्ने सति तत्रोच्यते यत् सूर्यसामीप्य वशाद् यैरशैग्रहबिम्बान्यस्तंगतानि पुनः तान्येव ग्रहबिम्बानि गत्यन्तरस्य वृद्ध्या येन कालेन पुनरूदगच्छन्ति तत्कालसम्बन्धिनोऽशाः कालांशाः इति शब्देन उच्यन्ते। सूर्यसान्निध्यवशात् कालांशाल्पान्तरे ग्रहबिम्बानां यल्लुप्तत्वं तदस्त्यस्तत्वम्, पुनः कालांशाधिकान्तरे च बिम्बस्य यद्दर्शनं तद् भवति तस्योदयत्वमिति ज्योतिर्विदां सिद्धान्तः।

पुनः ग्रहबिम्बानां बिम्ब-प्रमाणं तथा भूकेन्द्राच्च ग्रहबिम्बानामन्तरं भिन्नं-भिन्नं भवतिए अतः सर्वेषामपि ग्रहाणां कालांशाः विभिन्ना एव यथोक्तं कालांशाः भट्टकमलाकरेण-

**द्विसप्तवेदेन्दुखपंचभागा दिक्संयुक्ताः काललवा निरूक्ताः।**
**चन्द्रादिकानां भृगुसौम्ययोस्ते, द्विहीनिता वक्रगयोः स्वतन्त्रैः॥१०**

तत्र गुरूशुक्रयोः अस्तगमनादपूर्वं तेजहीनत्वेन वृद्धत्वम् एवं उद्यादन्तरं अल्पतेजः कारणात् बाल्यकाल उक्तः। सोऽपि दोषाय प्रदर्शितः-

**बालभावेस्त्रियं हन्याद् वृद्धभावे नरं तथा।**
**तस्माद् बाले च वृद्धे च विवाहं नैव कारयेत्॥**
**विवाहो व्रतबन्धो वा यात्रा वा गृहकर्म च।**
**गुरावस्तमिते शुक्रे ध्रुवं मृत्युं विनिर्दिशेत्॥**[11]

इत्थं नैषधमहाकाव्ये राज्ञा भीमेनापि तादृशमेव प्रशस्तशुभलग्नं नलाय पुत्रीं दमयन्तीं दातुं विनिश्चितम्।

**निरीय भूपेन निरीक्षिताननना शशंस मौहूर्तिकसंसदंशकम्।**
**गुणैररीणैरूदयास्तनिस्तुषं तदा स दातुं तनयां प्रचक्रमे॥**[12]

ज्योतिषशास्त्रे कालस्य नवमानानां गणना विहिताऽस्ति। तत्र ''संक्रान्त्या सौर उच्यते'' अर्थात् रवेः संक्रान्त्या सौरमासः भवति। पुनः मासैर्द्वादशभिर्यद् मानुषवर्षं तद् देवानामेकं दिनमुच्यते।[13] पुनः तेषामहोरात्राणां षष्ठ्याधिकत्रिशतमानुषसौरवर्षैरेकं दिव्यवर्षं भवति।[14] पुनः द्वादशसहस्त्रदिव्यवर्षाणां कृत-त्रेता-द्वापर-कलीनां युगानां समाहारः तदेकं महायुगमिति प्रथितम्।[15] पुनः एकसप्ततिः महायुगैः मन्वन्तरकालमानमुच्यते।[16] एवं ससन्धिचतुर्दशमनुवर्षात्मकः कालः कल्पसंज्ञकः भवति।[17] स एव कल्पः ब्रह्मसम्बन्धि दिनमेकं प्रोक्तमार्यैः। तथा च तावती प्रमाणात्मिका रात्रिः भवति।[18] एवं प्रकारेण कल्पद्वयात्मिकया अहोरात्रसंख्यया शतवर्षाणां परमायुः नाम ब्रह्मणः जीवनकालमानं ज्ञातव्यम्।[19] अत्र काव्ये विरहवेदनया युक्ता दमयन्ती वदति यत् ब्रह्मणः क्षणमितं कालो मनुष्यस्य युगं भवति, परं च सुरतं कुर्वतोर्युनोः क्षणमितं कालो विरहिणां युगं भवतीति नोक्तः अर्थात् ब्रह्मणो दिनं देवादीनां युगादिकमित्युक्तम् परं च सुरतं कुर्वतोर्यूनोः क्षणमितः कालो विरहिणां युगं भवतीति ज्योतिष शास्त्रे वक्तव्यम् आसीत् इति भावः -

**नरसुराब्जभुवामिव यावता भवति यस्य युगं यदनेहसा।**
**विरहिणामपि तद् रतवद्युवक्षणमितं न कथं गणितागमे॥**[20]

तत्र फलितशास्त्रानुसारं दिगीश्वराः क्रमशः भास्करशुक्रभौमराहवार्किचन्द्रज्ञसुरार्चिताः कथिताः। पुनश्च जन्मकुण्डल्यां सूर्यबुधशुक्रग्रहाः कदाचित् सहैव कदाचित् एकस्य द्वयोर्भावयोरन्तराले भवन्ति। वराहचार्येणापि उक्तम् - ''चतुर्थभवने सूर्याज्ज्ञसितौ भवतः कथम्''[21] अतः सूर्योदये वान्यस्मिन् कालेऽपि बुधशुक्रौ सूर्यस्य समीपे एव तिष्ठतः। एतदाश्रित्य नलस्योदयवर्णनं कुर्वन्नाऽऽह-

**अजस्त्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन।**
**दधौ पटीयान समयं नयन्नयं दिनेश्वरश्रीरूदयं दिने-दिने॥**[22]

अर्थात् दिवसे शिवस्येव श्रीरयं समर्थतरो देवः सूर्यः सततं सहचारिभ्यां बुधशुक्राभ्यां सह सुखेन समयमतिवाहयन् प्रतिदिनमुदयगिरिं प्राप्नोतीति।

अथ च श्रीपतिः मतानुसारं-

**''ललाटगे न प्रवसेद् दिगीशे गन्तव्यमस्मिन् खलु कण्टकस्थे''**[23] ललाटिकयोगे न यात्रा प्रशस्ता। तत्र प्राच्यादि अष्टदिक्षु क्रमेण दिगेशानुसारमेव लालाटिकयोगः भवति। अयमंशो नैषधे यदा दमयन्ती हंसं गृहीतुं तत्पृष्ठमनुसृतवती तदातत्सख्य शब्दच्छलेन तस्या उपहासं कृतवत्यः यत् भवत्याः तवेयं हंसाभिमुखी यात्रा न प्रशस्ता। तस्य उत्तरे सति दमयन्ती उक्तवती यत् मयानुगम्यमानो हंसो अपशकुनो न भवेत् किन्तु भविष्यतः शुभस्य सूचकः शकुन एव भवेद् -

**शस्ता न हंसाभिमुखी तवेयं यात्रेति ताभिश्छलहस्यमाना।**
**साह स्म नैवाशकुनी भवेन्मे भाविप्रियावदेक एष हंसः॥**[24]

तत्र चान्द्रयोगाध्याये चन्द्रस्योभयपार्श्वे सूर्यमतिरिच्यान्यग्रहाः स्थिताः भवेयुस्तदा दुरूधराख्ययोगो भवति।अस्मिन् योगे उत्पन्नजातकः भोग-सुख-धन-वाहनादिभिर्युक्तः भवति।[25] महाकाव्ये नलस्य प्रियकामोत्पत्तौ अयं योगः चन्द्रस्थानीयदम्यन्तीमुखस्य अभितः स्थिताभ्यां कुण्डलाभ्यां सूर्यातिरिक्तशिष्टग्रहस्थानं लब्ध मिति दुरूधरासम्बन्धिनीं भारं वहति।

अवादि भैमी परिधाप्य कुण्डले वयस्ययाभ्यामभितः समन्वयः।
**त्वदाननेन्दोः प्रियकामजन्मनि श्रयत्ययं दौरूधरीं धुरं ध्रुवम्॥२६**

एवमेवप्रकारेण महाकाव्येऽस्मिन हर्षेण रेखाष्टकवर्गस्य[27], शनिग्रहस्वरूप[28], तेजोवन्तौ सूर्यचन्द्रमसौ[29], सत्यत्रेताद्वापरकलिचतुर्णा युगाना[30], गणितशास्त्रस्य[31], विवाहकुलसन्दर्भस्य[32], चन्द्रग्रहस्य[33], सचमत्कारीत्या वर्णनं कृतमस्ति।

विविधशास्त्रपारंगतेन प्रौढ़पाण्डित्यपरिलसितेन महाकविनानेन महाकाव्येऽस्मिन् शास्त्रीयज्ञानं प्रतिपदं विनिहितमस्ति। अतः सत्यमेव उक्तं यत् -

''उदिते नैषधे काव्ये क्व माघः क्व च भारविः।
तथा च-नैषधं विद्वदौषधम्। इत्यलं विस्तारेण

संदर्भग्रन्थसूचि -

1. सिद्धान्ततत्वविवेक- श्लोक संख्या 3
2. सिद्धान्तशिरोमणि गोलाध्याय श्रृंगोनतिवासना- श्लोक संख्या 1
3. नैषधीयचरितम् - 6/7
4. वृहद्जातक - 2/5
5. नैषधीयचरितम् - 4/62
6. सिद्धान्तशिरोमणि गोलाध्याय ग्रहगणितवासना - श्लोक संख्या 9
7. तत्रैव - श्लोक संख्या 10
8. नैषधीयचरितम् - 12/94
9. मुहूर्तचिन्तामणिः - पृष्ठ 55
10. सिद्धान्ततत्वविवेक उदयास्ताधिकार - श्लोक संख्या 138
11. मुहूर्तचिन्तामणिः - पृष्ठ 55
12. नैषधीयचरितम् - 15/8
13. मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यते - सूर्यसिद्धान्त 1/13
14. तत्षष्टिः षडगुणादिव्यं वर्षमासुरमेव च - तत्रैव - 1/14
15. तद्द्वादश सहस्त्राणि चतुर्युगमुदाहृतम् - तत्रैव 1/15
16. युगानां सप्ततिः सैकामन्वन्तरमिहोच्यते- तत्रैव 1/18
17. ससन्ध्यस्ते मनवः कल्पे ज्ञेया चतुर्दश- - तत्रैव 1/19
18. कल्पो ब्रह्मह: प्रोक्तं शर्वरी तस्य तावती - तत्रैव 1/20
19. परमायु शतं तस्य तयाऽहोरात्रसंख्यया - तत्रैव 1/21
20. नैषधीयचरितम् - 4/44
21. मूहूर्तचिन्तामणि - पृष्ठ संख्या 518
22. नैषधीयचरितम् - 1/17
23. मूहूर्तचिन्तामणि - पृष्ठ संख्या 517
24. नैषधीयचरितम् - 3/9
25. उत्पन्नभोगसुखभाग्धनवाहनाढ्य स्त्यागान्वितो दुरूधराप्रभवः संभृत्यः। फलदीपिका - 6/7
26. नैषधीयचरितम् - 15/14
27. नैषधीयचरितम् - 9/119
28. नैषधीयचरितम् - 5/136
29. नैषधीयचरितम् - 12/93
30. नैषधीयचरितम् - 13/36
31. नैषधीयचरितम् - 12/106
32. नैषधीयचरितम् - 15/6
33. नैषधीयचरितम् - 4/47, 49, 50, 55

प्रथमपुटस्य शेषभागः

## पतंजलि विश्वविद्यालये वैदिक...

शुभाशीर्वादं प्रदाय शास्त्र- अध्ययनं-अध्यापनं स्मरणं च कृत्वा परम्परा रक्षणीया इत्युक्तवान् ।

शास्त्रीय कण्ठपाठ प्रतियोगितायाः रूपरेखां अतिथि विदुषां च स्वागतं परिचयं च प्रति-कुलपतिः एवं च वैदिक विद्वान् प्रो. महावीर अग्रवालः अकरोत् तेनोक्तं यत् अस्मद् ऋषि-मुनिभिः अस्मान् भयमुक्तान्, रोगमुक्तांश्च कर्तुं शास्त्ररचना विहिता तेषां रक्षणार्थमियं प्रतियोगिता। उद्घाटन सत्रे गुरुकुल कांगड़ी विश्वविद्यालयस्य कुलपतिः डॉ. सोमदेव शतान्शुः, उत्तराखण्ड संस्कृत .विश्वविद्यालयस्य कुलपति प्रो. दिनेश चन्द्र शास्त्री, नेपालस्य उद्योगपतिः एवं च प्रथम गुरुकुलस्थापकः श्री सुरेश शर्मा, संस्कृतस्य महाकवि एवं पतंजलि वि. वि. संस्कृत विभागाध्यक्षः प्रो. मनोहर लाल आर्यः, भगवानदास संस्कृत महाविद्यालयस्य प्राचार्यः एवं च व्याकरणाचार्यः डॉ. भोला झा, केन्द्रीय संस्कृत विश्वविद्यालय देवप्रयागस्य मर्मज्ञ विद्वान डॉ. विजय पाल प्रचेता एवं च पतंजलि वि.वि. कुलानुशासिका एवं मानविकी व प्राच्य विद्या अध्ययनस्य अध्यक्षा डॉ. साध्वी देवप्रिया इत्येते विद्वांसः स्वम् उद्बोधनं दत्तवन्तः। प्रतियोगितावसरे मर्मज्ञैः विद्वद्भिः प्रतिभागिनाम् अनेक प्रकारेण शास्त्र-स्मरण सम्बंधी मौखिक परीक्षा स्वीकृता यत्र छात्र- छात्राः आश्चर्यजनकं भावपूर्णं प्रदर्शनं कृतवन्तः।

कार्यक्रमे पतंजलि विश्वविद्यालयस्य विभिन्न संकायानाम् अध्यक्षाः, वरिष्ठ आचार्यगणः, साध्वी देवसुमना, मुख्य महाप्रबंधकः ब्रि. मल्होत्रा, भारत स्वाभिमानस्य केन्द्रीय प्रभारी राकेश एवं स्वामी परमार्थदेवः, स्वामी आर्षदेवः इत्येते उपस्थिताः। उद्घाटन सत्रसंचालनं स्वामी ईशदेवद्वारा विहितम् ।

## उज्जयिन्यां काशीविश्वनाथमन्दिर-न्यासदलस्य अभिनन्दनम्

वार्तासंयोजकः डॉ.दिनेश:चौबे,

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य योगेश्वरश्रीकृष्णयोगभवने ऊनविंशतितमे दिनाङ्के काशीविश्वनाथमंदिरन्यासस्य अध्यक्षः आचार्यः नागेन्द्रपाण्डेय वर्य:विशिष्टातिथिरूपेण एवञ्च आचार्य:पण्डितब्रजभूषणओझा वर्यः सारस्वतातिथिरूपेण उपस्थितौ आस्ताम् । मङ्गलाचरणात् परं छात्रैः सरस्वती वन्दना कुलगानं च् प्रस्तुतं ।अवसरैस्मिन् विश्वविद्यालयस्य कुलपतिवर्येण आचार्यविजयकुमारसीजी महोदयेन समागतानाम् अतिथिनाम् उत्तरीयवस्त्रप्रदानेन स्मृतिचिन्हेन ,नारिफलेन, पुष्पमालया च सम्मानं



विहितम् । वाचिकं स्वागतं डॉ.तुलसीदास पारौहामहोदयेन कृतम्।आचार्य नागेन्द्रपाण्डेयवर्येण उक्तं यत् संस्कृतछात्राः शास्त्राध्यनेन समाजे परिवर्तनानि कर्तुं शक्नुवन्ति।शस्त्राध्यनेन एव अस्माकं परम्परा संरक्षिता भवेत्। पारंपरिकज्ञानेन सह आधुनिकं ज्ञानम् अपि आवश्यकं वर्त्तते अनेन नूतनोद्योगावसराः उद्घाटिताः भवन्ति। राष्ट्रपतिपुरुस्कारेणसम्मानितो आचार्यओझामहोदयेन कथितं भारतीयज्ञानपरम्परायाः संरक्षणाय पाणिनिसंस्कृत विश्वविद्यालयः सतत् प्रयत्नशीलः अस्ति। उज्जयिन्यां संस्कृतच्छात्राणां कृते संस्कृताध्यनाय विश्वविद्यालयेन सर्वविध साहाय्यं क्रियते। शास्त्र संरक्षणं सर्वेषां संस्कृतज्ञानाम् सामूहिकम् उत्तरदायित्वम् अस्ति। उज्जयिनी लघुकाशी इव दृश्यते। कुलपतिमहोदयेन उक्तं यत् संस्कृतविश्वविद्यालयाः शास्त्रपरम्परा संरक्षणार्थं स्थापिताः सन्ति। नीतिनिधिरणं कृत्वा संस्कृतस्य कार्यं करणीयम्। उज्जयिनी पुराकालात् एव ज्ञाननगरी अस्ति।कार्यक्रमे कुलसचिवः डॉ. दिलीपसोनी, डॉ. तुलसीदासपारौहा, डॉ. अखिलेशकुमारद्विवेदी, डॉ. शुभम शर्मा, डॉ.उपेंद्रभार्गवः डॉ.अजयराठी, डॉ. अनिलमुवेल:अन्य आचार्याः, छात्राः उपस्थिताः आसन्। कल्याण मन्त्रेण सह सभा समाप्ता अभवत्।





| प्रचार संस्करण (अजिल्द) 23x36%16 | मुद्रित मूल्य ₹60 | प्रचारार्थ ₹40 |
|---|---|---|
| विशेष संस्करण (सजिल्द) 23x36%16 | ₹100 | ₹60 |
| पॉकेट संस्करण | ₹80 | ₹50 |
| विशिष्ट पॉकेट संस्करण | ₹150 | ₹100 |
| स्थूलाक्षर (सजिल्द) 20x30%8 | ₹150 | ₹100 |
| उपहार संस्करण | ₹1100 | ₹750 |
| सत्यार्थ प्रकाश अंग्रेजी अजिल्द | ₹200 | ₹130 |
| सत्यार्थ प्रकाश अंग्रेजी सजिल्द | ₹250 | ₹170 |





## वेदाः भारतस्य अस्तित्वस्य प्रतीकाः-कुलपतिःआचार्यः हरेरामत्रिपाठी

डॉ.दिनेशः चौबे,उज्जयिनी

उज्जयिनीस्थमहर्षिपाणिनि संस्कृतवैदिकविश्वविद्यालयस्य वेदव्याकरणविभागदर्शनविभागाः एवञ्च नवदेहलीस्थभारतीयदार्शनिकानुसन्धानपरिषदः इत्यनयोः संयुक्ततत्त्वावधानेन वैदिकभाषादर्शनमुच्चारणविज्ञानञ्च इति विषयमधिकृत्य समायोजितत्रिदिवसीयसङ्गोष्ठ्याः





समापनम् अधिकश्रावणशुक्लदशम्यां तदनु अष्टविंशतितमे दिनाङ्के शुक्रवासरे माधवसेवान्यासस्य सभागारे, भारतमातुः मन्दिरं निकषा, महाकालमन्दिरं प्राङ्गणे सन्जातम् । समापनसत्रे सभाध्यक्षरूपेण विश्वविद्यालयस्य कुलपतिःआचार्यविजयकुमारः सीजीमहोदयः उपस्थितः आसीत्। मुख्यातिथिरूपेण नागपुरस्थस्य कविकुलगुरुकालिदाससंस्कृत विश्वविद्यालयस्य कुलपतिः आचार्यः हरेरामत्रिपाठिमहोदयः, विशिष्टातिथिरूपेण कुलपतिचरा उमावैद्यमहोदया तथा च् विशिष्टवक्तृत्वेन देहलीस्थस्य श्रीलालबहादुरशास्त्रिराष्ट्रिय संस्कृतविश्वविद्यालयस्य आचार्यः रामसलाहीद्विवेदिमहोदयः च उपस्थिताः आसन्। सङ्गोष्ठ्यामस्याद्वादशराज्यात् शोधच्छात्राः, प्राध्यापकाः शोधपत्रवाचनं कृतवन्तः शताधिकानि शोधपत्राणि सङ्गोष्ठ्यामस्यां प्रतिपादितानि।

समापनसत्रे आचार्यः हरिरामत्रिपाठिमहोदयः वेदानामपौरुषेयत्वं विविधानामैतिहासिकानां दार्शनिकानां च मतानि उपस्थापितवान्। विशिष्टातिथिः आचार्या उमावैद्यमहोदया शिशूनामुच्चारणसम्बद्धं विज्ञानं प्रतिपादितवती। विश्वविद्यालयस्य मान्यःकुलपतिः उच्चारणविज्ञानेन छात्ररक्षणं सम्भवति तथा संस्कृतं विज्ञानस्य भाषा इति उक्तवान् । सङ्गोष्ठीसंयोजकः डॉ. अखिलेश कुमारद्विवेदीमहोदयः प्रतिवेदनं प्रस्तुतवान् सर्वेषां समागतानाम् अतिथिनाम् आभारं च विनिवेदितम्। ततः प्रमाणपत्राणां वितरणम् अपि जातम्। कार्यक्रमे आचार्या इलाघोषमहोदया, डॉ.पीयूषत्रिपाठि, डॉ. केएसनारायणन्, डॉ.हिम्मतलालशर्मा, डॉ. सदानन्द त्रिपाठी, डॉ. यसशर्मा, डॉ.शुभम् शर्मा, डॉ.उपेन्द्रभार्गवः प्रमुखरूपेण उपस्थिता:आसन् कुलसचिवः डॉ. दिलीपसोनी महोदयस्य मार्गदर्शने सङ्गोष्ठीरियं आयोजिता आसीत्।समापन सत्रस्य सञ्चालनं डॉ.संकल्पमिश्रमहोदयेन , आभारप्रदर्शनं डॉ.तुलसीदास पारौहामहोदयेन कृतम्। अत्र सर्वे शोध च्छात्राः आचार्याः नगरस्य सम्मानितजनाः, वार्ताहरा:कला सम्बद्धजनाः च् उपस्थिताः आसन् । कल्याण मन्त्रेण सह सभा समाप्ता जाता।

अस्माकं प्रेरणास्त्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।